॥स·जी·प्र· सन्नते ॥१३८॥ एतच्चक्षुर्नेर्विजानीयं नेकुलकाः संस्तनि प्रदाः॥ देशकालानुसारास्तु कृष्णजीलासुयेन्नः अ०२८॥
॥६४॥ णाम् ॥१३९॥ निरीशशास्त्रश्रुतिं न विष्णो मतिं नयारिषु॥ वर्तते ऽहेतुतानानैकालादेश्च निवर्त्तते
॥१४०॥ एतद्देवान्यसेन्निसं मुमुक्षुर्नेक्तिकृद्ये॥ मम कम्प्रुरूपज्ञानार्थंपी कृष्णस्य च समन्ते:॥१४१
॥अधीयते ज्ञानमेतत्मकृशादशच्चपे॥ भगवद्विषयास्ते पांसर्वे नश्यंति संशयाः॥१४२॥ दिव्यं कृष्ण
स्वरूपं भवतिच समन्ततं तस्य लोकोपिदिव्योदिव्या भोगाश्च भोग्यान्यपिच भगवन्तस्यदिव्यानि संति
॥दिव्या पार्षदाश्च प्रकृतिस्तत्तनोः शक्तयस्तस्यदिव्यादि व्याभक्ताश्च सर्वे जगतिपउपतेः संति दिव्या
:क्रियाश्च ॥१४३॥ स्यं निर्दोषं रूपं सकलगुणगणालंकृतं दिव्यमूर्त्तिलालं श्रीवासुदेवं भजतानुविम
लामुक्तयेभो मरीयाः॥ एकस्मिन्नद्वितीये भगवतिच परब्रह्मणि द्वैतबुद्धिः कर्त्तव्या नैवतस्मिन्नणुर
पिचकुधीः सच्चिदानंदरूपे॥१४४॥ कृत्रतउवाच॥ इति श्रुत्वाऽऽकृस्नोर्हरिगदितमद्वैतसुधिरार माभ
र्त्तुः सौऽभूत्स हसकलजनकैः प्रमुदितः॥ नराकारेतस्मिन्भगवतिहिनारायणमुनौरदंदिव्यंभावंस
पदिनृपतेप्रापदमलम्॥१४५॥ स्वरूपादैतंयः पठतिश्रृणोतीहविमलं परंज्ञानंनारायणमुनिमुखा
न्निःसृतमिदम्॥ प्रभौतस्मिन्भक्तिंपरमसुखरूपेसपरमांसभुक्तिंमुक्तिंचेप्सितमखिलसौख्यंहिज ॥६४॥

भते॥१४६॥ इति श्रीसत्संगिजीवनेनारायणचरित्रे धर्मशास्त्रेऽस्तिप्रकरणे पञ्चमप्रसंगे श्रीनाराय
णमुनिकानंदस्वामीश्रीकृष्णस्वरूपाद्वैतज्ञाननिरूपणनामैकोनत्रिंशोऽध्यायः॥२९॥ कृत्रतउवाच॥
तेराजमानेसदृक्षिनवम्यांचनिशागमे॥ वासुदेवानंदनामापप्रच्छवर्णिराट्स्थ॥१॥ कृष्णमंत्रजपस्याहं
कार्यस्यश्रत्महे हरे॥ विधानंश्रोतुमिच्छामिहृतसिद्धोऽस्मयेनवै॥२॥ श्रीनारायणमुनिरुवाच॥ कथया
मिसमासेनविधिंतेवर्णिसत्तम॥ मंत्रराजजपस्याहंसच्छास्त्रप्रतिपादितम्॥३॥ स्नातःशुचिःस्वस्थ
चित्तःक्रोधचिंताविवर्जितः॥ सद्गुरुप्राप्तमंत्रश्चजापकःपुरुषोमतः॥४॥ पतीनामासनंस्वच्छंकूर्मा
कारसुदीरितम्॥ अन्येषांतुचतुष्पादंचतुरस्रंचसंमतम्॥५॥ कार्ष्णाजिनंव्याघ्रचर्मकौशेयंचैत्रनि
र्मितम्॥ वास्त्रंवाकांबलंकौशमासनंजपसिद्धिदम्॥६॥ गोमयेनभूम्यंभिन्नंपाषाणंपैप्पलंतथा॥
लोहंवद्दंवैशानंचपाषाणंवर्जमासनम्॥७॥ काष्ठंचाघटितंवर्जंजोहकीलमयंत्यजम्॥ स्पादरपदि
स्तुमंसर्वविनात्रशुचिलेपनम्॥८॥ अथजपमालानिर्णयः॥ तुलसीकाष्ठसंभूताजपमालाशुभामता॥ धात्रीकाष्ठभवावापिपवित्रीनोरुवालया॥९॥ तथास्फाटिकमालाचप्रात्याऽरुद्राक्षमालिका॥ कु
शग्रंथिभवावापिचंदनादिमयीचवा॥१०॥ सर्वापिमालाजाप्यविष्णुपादस्पर्शाच्छुचिर्भवेत्॥ जपोचिता

चलत्या तां विद्यात्ता दृशी तु मानुः ॥२१॥ निषिद्धा तु स्थिता चैव मशक्या च पुरातनी ॥ सग्रंथिर्जीर्णसूत्रे
णजपे माला विगर्हिता ॥२२॥ धृता पापैर्द्विभिर्या तु पापिभिश्च दुरात्मभिः ॥ असंस्कृता तथा माला जे
या दुःखप्रदा नृणाम् ॥२३॥ अष्टोत्तरशतेनोक्ता मणिभिर्मालिकोत्तमा ॥ मध्यमा स्यात्तदर्द्धेन तदर्द्धेन
कनीयसी ॥२४॥ अकारादिक्षकारांतान् वर्णान् सर्वान् क्रमेण वा ॥ लिखित्वा स्थापयेद्ग्रंथौ पंक्तौ चैव म
णिकानिव ॥२५॥ एकैकमानुलोम्येन प्रातिलोम्येन च क्रमात् ॥ पश्चाद्वर्णं जपं कुर्याद् दक्षमालेयमुच्य
ते ॥२६॥ आरभ्यानामिकामध्यात् प्रदक्षिणेन च क्रमात् ॥ तर्जनीमूलपर्यंतं जपेत्संख्या करमालि
का ॥२७॥ स्वस्तिकासनमासीनो मुक्तपद्मासनेन वा ॥ ऋजुरेकाग्रदृष्टिश्च भगवंतं हरिं स्मरन् ॥२८॥ व
स्त्रगोपितमालस्थ मंत्रमेकैकमुच्चरन् ॥ स्पृशन्नेकैकमणिकं जपन्नियतसंख्यया ॥२९॥ तर्जन्या नस्पृ
शेत्सूत्रं मध्यमामध्यपर्वणि ॥ अंगुष्ठपर्वणा मालामणिमेकैकमाहरेत् ॥३०॥ न स्पृशेद्वामहस्तेन जप
मालां कदाचन ॥ न पालयेत्करस्तांश्च जपं तावद्विधिज्ञापकः ॥३१॥ प्रमादात्पतिता यां तु माला यां स्यात्स्वहस्त
तः ॥ तदोपशांतये कुर्याज्जपमष्टोत्तरं शतम् ॥३२॥ मालायां स्पर्शयेद्भूमिं स्वस्य पादतलं तथा ॥ जपं कु
र्वन् हस्तं च धूलये च मस्तकम् ॥३३॥ उष्णीषी कंचुकी नग्नो मुक्तकेशो मलावृतः ॥ अपवित्रकरो



श्रुद्धः प्रजल्पन् जपं त्यक्त्वा कुचित् ॥२४॥ अप्रावृतकरश्चैव संवेष्टितशिरास्तथा ॥ चिंताव्याकुलम
नाः क्रुद्धो भ्रांतः क्षुधाकुलः ॥२५॥ अनासनः शयानश्च गच्छन्नुत्थित एव च ॥ उपानत्पादुकारूढो या
नशय्यागतस्तथा ॥२६॥ न जपेदेवमेवी मंत्रः प्रौढपादश्च कर्हिचित् ॥ प्रसार्य पादौ न जपेत्काकास
नगतस्तथा ॥२७॥ मद्दंसंस्तु रमालाश्च नेष्टमालाद्दलत्ततः ॥ करसंज्ञां नेत्रसंज्ञां कुर्वन्नेव जपेत्सुमा
न् ॥२८॥ रथ्यायामशिवस्थाने न जपेत्तिमिरांतरे ॥ दुर्गंधिवातस्थाने च न पापिजनसन्निधौ ॥२९॥
निशाखो ऽस्ति महानविघ्नो जपेत्तु जसहुल्पयेः ॥ जपेत्तं सावधानो नो विफलो ऽगस्त्यस्य यान् प॥
३०॥ अंगुल्यग्रे तु यज्जप्तं यज्जप्तं मेरुलंघने ॥ असंख्यातं तु यज्जप्तं तत्सर्वं निष्फलं भवेत् ॥३१॥ नि
षेधातिक्रमं नैव कुर्याद्दोषविनापदम् ॥ मनो नियम्य मतिमान् जपं कुर्वीत सर्वथा ॥३२॥ मनः
संयमनं शौचं मौनं मंत्रार्थचिंतनम् ॥ अव्यग्रत्वमनिर्वेदो जपसंसिद्धिहेतवः ॥३३॥ जपेच्च नियु
तो भक्त्या त्रिकालं पुरुषोत्तमम् ॥ वार्तां वा मानसे दुःखैः पूजयित्वा स्थिरांतरः ॥३४॥ मार्जारमूष
कस्पर्शे क्रोधे ऽधोवायुसर्पणे ॥ जपकाले तु संजाते माला वस्त्रे परिमसेत् ॥३५॥ आचम्य प्राणा
नायम्य दृष्ट्वा वार्कं हरिं स्मरन् ॥ शेषं कुर्याज्जपं स्थाने त्वासनं शौचमप्यवस्तुनः ॥३६॥ तपो नेशाजप

स्मोक्ताचाचिकीर्षां शुभमानसाः ॥ कलौ योगमधर्मोत्थं शास्त्रान्तातीत्समाचरेत् ॥ ३७ ॥ उदात्तानु 
दात्तस्वरितैः शब्दैः सप्तपदा स्वरैः ॥ मंत्रस्योच्चारणं यत्र स जपो वाचिको मतः ॥ ३८ ॥ किंचिच्छ्रवण
योग्यं च मंत्रस्योच्चारणं शनैः ॥ यत्रैषच्चौष्ठचलनं मत उपांशुर्जपो मतः ॥ ३९ ॥ धियाय ज्ञाक्षरश्रे
णीस्वरवर्णपदात्मिका ॥ उच्चार्यते च संस्मृत्य स जपो मानसो मतः ॥ ४० ॥ उच्चैर्जपादुपांशुः स्या
च्छ्रेष्ठो दशभिर्गुणैः ॥ जिह्वाजपः शतगुणः सहस्रगुण आंतरः ॥ ४१ ॥ गृहे जपं समं प्राहुर्गोष्ठे
दशगुणं तथा ॥ गृहोद्याने शतगुणं सहस्रगुणकं वने ॥ ४२ ॥ अयुतं पर्वते पुण्ये नद्यां लक्षगुणं
तथा ॥ देवालये कोटिगुणमनंतं हरिसन्निधौ ॥ ४३ ॥ सर्वं योषापि कुर्वीत नाममंत्रजपं हरेः ॥ स
धवा विधवा वापि भक्ता भगवतो नृप ॥ ४४ ॥ अस्नातो मानवा नैव जपं कुर्वीत कर्हिचित् ॥ आप
न्नो मानसं स्नानं कृत्वा कुर्याज्जपं पुमान् ॥ ४५ ॥ स्नानादिनियमो नास्ति मानसे तु जपे नृणाम् ॥ की
र्तने च हरेर्नाम्नां विना मार्जां कदाचन ॥ ४६ ॥ मार्जामशुचिहस्तेन न स्पृशेन्नाक्षिपेद्भुवि ॥ स्त्रियः पंच
मर्त्याश्चैव जपंते निर्दधीत वै ॥ ४७ ॥ एवं जपंति नियतं हरिनाममंत्रं ये मानवा भुवि सदैव च
वर्त्मस्थाः ॥ ते यांति धाम परमं परमात्मनो वै गोलोकसंज्ञमजं कमजाधवस्य ॥ ४८ ॥ कव्रत 

उवाच ॥ श्रुत्वा पुरातनमहामुनिनेत्थमुक्तं श्रीकृष्णमंत्रजपनिर्णयमाप तुष्टिम् ॥ वर्णी सभा स्वमु
निभिः सह भूमिपालः प्रीतो न नाम च हरिं स कृतार्थसिद्धिम् ॥ ४९ ॥ इति श्रीसत्संगिजीवने नारायण
चरित्रे धर्मशास्त्रे तृतीयप्रकरणे प्रबोधन्युत्सवे नारायणवर्णिवासुदेवानंदसंवादे श्रीकृष्णमंत्रज
पविधिनिरूपणनामा त्रिंशोऽध्यायः ॥ ३० ॥ कव्रत उवाच ॥ अथो दशम्यां तरणौ गतेऽस्तं विधाय
सां धर्मविधिं विधिज्ञः ॥ महासभायामुपविष्ट उच्चैः पीठे समभ्यास्य उवाच भक्तान् ॥ १ ॥ श्रीनारा
यणमुनिरुवाच ॥ शृण्वंतु मुनयः सर्वे गृहिणश्च स्त्रियोऽखिलाः ॥ हितं वदामि सर्वेषां गुरुत्वादहमा
दरात् ॥ २ ॥ प्रबोधन्यभिधा श्वोऽस्ति तिथिरेकादशी जनाः ॥ व्रतं तस्याः प्रकर्तव्यं सर्वैरेव मदाश्रि
तैः ॥ ३ ॥ अस्माकमिष्टदेवोऽस्ति श्रीकृष्णः पुरुषोत्तमः ॥ व्रतं तस्यैतदस्तीति सर्वैः कार्यं प्रयत्नतः ॥ ४
॥ न करोति हि यो मूढ एकादश्यामुपोषणम् ॥ स नरो नरकं याति रौरवं तमसावृतम् ॥ ५ ॥ यानि का
नि च पापानि ब्रह्महत्यासमानि च ॥ अन्नमाश्रित्य तिष्ठंति संप्राप्ते हरिवासरे ॥ ६ ॥ तानि पापान्यवा
प्नोति यो भुंक्ते हरिवासरे ॥ मातृहापि तदा चैव गुरुहा च स उच्यते ॥ ७ ॥ एकादश्यां तु यो भुंक्ते पक्ष
योरुभयोरपि ॥ प्रतिग्रासं स वै भुंक्ते मलं पृथ्वीसमुद्भवम् ॥ ८ ॥ निष्कृतिर्ब्रह्महत्याया शास्त्रे प्रोक्ता

मुनीश्वरैः ॥ एकादश्युपवासस्य निष्कृतिः क्वापि नोदिता ॥ ९ ॥ रहपानेन मद्यस्य पाते वनरकं 
व्रजेत् ॥ एकादश्युपवासस्तु पितृभिः सह मज्जति ॥ १० ॥ वैष्णवः पुरुषः स्त्री च कुर्यादेकादशी
व्रतम् ॥ यथा शुक्ला तथा कृष्णा विशेषो नात्र विद्यते ॥ ११ ॥ अष्टवर्षाधिको मर्त्यो ह्यशीतिन्यून
वत्सरः ॥ एकादशीमुपवसेत् पक्षयोरुभयोरपि ॥ १२ ॥ ब्रह्मचारी गृहस्थश्च वानप्रस्थश्च भिक्षु
कः ॥ एकादशीव्रतं कार्यं तैश्च स्त्रीभिश्च सर्वशः ॥ १३ ॥ विधवा या भवेन्नारी कुर्वीतैकादशी दिने ॥ त
स्मात्तु सुकृतं नश्येत् सहस्रादिने दिने ॥ १४ ॥ संप्राप्य वासरं विष्णोर्यो नरः संयतेंद्रियः ॥ उपवास
परो भूत्वा पूजयेन्मधुसूदनम् ॥ १५ ॥ तत्कथाश्रुतिकीर्तिभ्यां रात्रौ कुर्याच्च जागरम् ॥ स शोधयति पा
पानि शारदं बुमजं यथा ॥ १६ ॥ एकादशी समुत्थेन वह्निना पातकेंधनम् ॥ भस्मतां याति सकृज्ज
मपि जन्मशतोद्भवम् ॥ १७ ॥ नेदृशं पावनं किंचिन्नराणामिह विद्यते ॥ यादृशं पद्मनाभस्य दिनं पा
तकहानिदम् ॥ १८ ॥ तावत्पापानि देहेऽस्मिंस्तिष्ठंति हि महांत्यपि ॥ यावन्नोपोष्यते मर्त्यैः पद्मनाभ
दिनं शुभम् ॥ १९ ॥ कुरुक्षेत्रे तु यत्पुण्यं ग्रहणे चंद्रसूर्ययोः ॥ गोदानेन भवेत्तत्तु तस्मादेकादशीमुपो
षणात् ॥ २० ॥ तपस्विनो गृहे नित्यं यः संयम्य च भुंजते ॥ षष्टिवर्षसहस्राणि तस्य पुण्यं तु यद्भवेत् ॥ 

२१ ॥ एकादशीव्रतेनैव तत्पुण्यं प्राप्नुयान्नरः ॥ स्वधर्मरहितो नित्यं वासुदेवपरायणः ॥ २२ ॥ अश्व
मेधसहस्राणि राजसूयशतानि च ॥ एकादश्युपवासस्य कलां नार्हंति षोडशीम् ॥ २३ ॥ एकाद
शेंद्रियैः पापं यत्कृतं पूर्वजन्मसु ॥ एकादश्युपवासेन तत्सर्वं विलयं व्रजेत् ॥ २४ ॥ एकादश्या समं
किंचित्पापत्राणं न विद्यते ॥ व्याजेनापि कृता यातु न दर्शयति भास्करिम् ॥ २५ ॥ स्वर्गमोक्षप्रदा ह्ये
षा शरीरारोग्यदायिनी ॥ कलकलत्रप्रदा ह्येषा राज्यपुत्रप्रदायिनी ॥ २६ ॥ न गंगा न गया चापि
न काशी न च पुष्करम् ॥ न चापि कौरवं क्षेत्रं न रेवा न च देविका ॥ २७ ॥ यमुना चंद्रभागा च तुल्या नैवा
न यायतः ॥ अनायासेन व्रतिभिः प्राप्यते भवाः परंपदम् ॥ २८ ॥ रात्रौ जागरणोपेतं समुपोष्य हरेर्दि
नम् ॥ सर्वपापनिर्मुक्तो विष्णुलोकं व्रजेन्नरः ॥ २९ ॥ दशैव मातृके पक्षे तथैव दशपैतृके ॥ प्रियाया
दश चात्मानं पुरुषानुद्धरेत्स च ॥ ३० ॥ कल्पद्रुचिंतामणिवन्नृणां वांछितपूरणी ॥ भवत्येकादशी त
स्मात् व्रतात्पूर्णकामना ॥ ३१ ॥ एकादशीप्रपन्नायेन रास्ते दिनरोत्तमाः ॥ दिव्यं दृष्ट्वाहवो भूत्वा नागा
रिकृतवाहनाः ॥ ३२ ॥ स्रग्विणः पीतवस्त्राश्च प्रयांति हरिमंदिरम् ॥ प्राप्नुवंति पुनर्नैव संसृतिं च कदा
चन ॥ ३३ ॥ एष प्रभावो हि मयात्र्येकादश्याः प्रकीर्तितः ॥ पापेंधनस्य सर्वस्य पावकाख्यो महीतले ॥

॥स॰जी॰तृ॰ २४ ॥ माहात्म्यमेकादशीकाव्रतस्य श्रुत्वाऽत्र पापक्षयकारि भक्त्या ॥ प्रोक्तं मयैतद्धृदये च धार्यं तत्का अ॰ ३२ ॥
॥ ७२ ॥ र्यमेव स्वहिताय सर्वैः ॥ २५ ॥ इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे चतुर्थप्रकरणे प्रबोध
सुप्तैकादशीव्रतमाहात्म्यनिरूपणनामैकत्रिंशोऽध्यायः ॥ ३१ ॥ सुव्रत उवाच ॥ एकादश्यास्तु मा
हात्म्यमित्थं भगवतोदितम् ॥ श्रुत्वा हृष्टजनाः सर्वे धर्मनिष्ठास्तु निर्भरम् ॥ १ ॥ तेषु ये प्रश्ननिपुणा
जनास्ते प्रश्रयान्वितम् ॥ पप्रच्छुः स्वामिनं भक्त्या बद्धांजलिपुटा नृप ॥ २ ॥ जना ऊचुः ॥ तिथिरेकादशी
स्वामिंस्त्वया सर्वव्रताधिका ॥ प्रोक्ता महाफला चात्र हेतुं नो वक्तुमर्हसि ॥ ३ ॥ सुव्रत उवाच ॥ इति पृ
ष्टो निजैर्भक्तैर्भक्तवत्सलईशिता ॥ तन्माहात्म्याधिक्यहेतुं वक्तुं समुपचक्रमे ॥ ४ ॥ श्रीनारायणमु
निरुवाच ॥ तन्माहात्म्याधिकत्वं तु विष्णोः संबंधतो नृणाम् ॥ सर्वेषां जायते नूनमिति जानीत सु
व्रताः ॥ ५ ॥ साक्षाच्छ्रीवासुदेवस्य देहजत्वात्तथा वरात् ॥ माहात्म्यमीदृशं तस्या यथा जातं तथा ब्रु
वे ॥ ६ ॥ आसीत्सुरारिः कृतयुगे नाडीजंघाभिधोऽसुरः ॥ तस्य पुत्रो मुरो नाम्ना बभूवातिबलोद्धतः ॥ ७ ॥
ब्रह्माणं तपसाराध्य दुष्करेण स दैत्यराट् ॥ देवैः सर्वैरवध्यत्वं वरं लेभे निजेप्सितम् ॥ ८ ॥ ततो मदोद्ध
तः सर्वान्स जित्वा दिक्पतीनद्भुतम् ॥ चक्रे स तेजसैवाम्यं निशादीनेकराट् स्वयम् ॥ ९ ॥ ततः सुर ॥ ७२ ॥

गणाः सर्वे स्थानभ्रष्टा हृतौजसः ॥ नीता दैत्यपतेः श्रेरुः कामरूपा महीतले ॥ १० ॥ काले च कियता
तेऽपि दुःखितास्त्रिदिवौकसः ॥ ब्रह्माणं शरणं गत्वा स्वीयं दुःखं न्यवेदयन् ॥ ११ ॥ अकम्प्यस्तत्प्रती
कारे सोऽपि तैः शंकरेण च ॥ साकं जगाम क्षीरोदं श्वेतद्वीपोऽस्ति यत्र तु ॥ १२ ॥ तीरे पयोनिधेस्तस्य स
माहितधियः सुराः ॥ तेपुस्तपः परं कांतं निराहारा जितेन्द्रियाः ॥ १३ ॥ एकपादस्थिताः सर्वे ह्यूर्ध्वलो
चनबाहवः ॥ चक्रुस्तीव्रं तपो यावत्तावत्तत्सादमभीप्सवः ॥ १४ ॥ तेषामत्युग्रतपसा संतुष्टः कमः
जापतिः ॥ प्रादुर्बभूव वैकुंठस्तेषामग्रे महाद्युतिः ॥ १५ ॥ तपस्यंतः सुरास्ते च महांतं ददृशुस्तदा ॥ अ
पुत्रार्कप्रतीकाशं तेजःपुंजमतर्कितम् ॥ १६ ॥ तत्र श्रीवासुदेवं ते साक्षाद्दिव्यं जगत्पतिम् ॥ ददृशु
रम्यया साकं सेवितं पार्षदोत्तमैः ॥ १७ ॥ चतुर्भुजं गदापद्मशंखचक्रविभूषितम् ॥ इंदीवरमणि
श्यामं पद्माक्षं सुस्मिताननम् ॥ १८ ॥ ततस्तं परया भक्त्या नत्वा स्तुत्वा प्रसाद्य च ॥ सर्वे निवेदयामासुः क
र्म दैत्यपतेस्तु तत् ॥ १९ ॥ दृष्ट्वा देवगणान्क्लिष्टान्भगवान्करुणानिधिः ॥ प्रदाय तेभ्योऽत्राभयं दैत्यं हं
तुं मनोऽकरोत् ॥ २० ॥ देवैः सहैव तस्याथ गत्वा चंद्रवतीपुरीम् ॥ पांचजन्यं हरिर्दध्मौ तेनैवत्रेसुः सुरा
रयः ॥ २१ ॥ अमृष्यमाणस्तं नादं सुरः सयुयुधे सुरैः ॥ अस्त्राक्तास्तस्य हारं ते सोढुं दश दिशो ययुः

स॰जी॰लू॰ २२॥ भगवानपि चक्रेण युद्धं कुर्वन्महारणम्॥ देवैर्नु राज्ञाकनमुरेम हस्त्रं वत्सरायुतः॥२३॥ ततः अ०३२॥
॥७३॥ श्रांतो हरिः शायात्वं कीयं बदरीवनम्॥ गुहां सिंहवतीं तत्र प्राप्य शिश्ये भयादिव॥२४॥ ऽंडियाः
णि दशैकं च मत्स्वरूपोन्मुखाः निसः॥ विधाय सीनं कारागृयोगनिद्रांसणं प्रभुः॥२५॥ योजनानि
द्वादशैव विस्तीर्णामेकनिर्गमाम्॥ तां गुहां शृध्रजन्नोसौ मुरश्चापाययौद्रुतम्॥२६॥ संमागतं ह
रिं दृष्ट्वा उन्नं पादैस्समुद्यतम्॥ चक्रोधतस्मैविज्ञाय वरेण वध्यतां विधेः॥२७॥ एकादशेंद्रियभवा
त्तदानीतस्य तेजसः॥ दिव्यप्रहरणे कान्तीव भूत्वा तितपस्विनी॥२८॥ रूपसौभाग्यसंपन्नां दृष्ट्वा तां
सतु दानवः॥ युध्येमां वरयस्वेति प्रार्थयामास सादरम्॥२९॥ तं काम विह्वलं देवी प्राह मा रेस मां
युधि॥ जित्वा गृहाण यस्मान्मे व्रतं मे तावत्स्मृतिः॥३०॥ ततस्तया सयुयुधे शस्त्रैरस्त्रैश्च दानवः॥ कु
द्धा चिच्छेद सा तस्य शिरः खड्गेन दुर्मतेः॥३१॥ ततः प्रसन्नो भगवान्देवता श्चातिहर्षिताः॥ प्रशशंसु
र्यतः पश्चाद्युश्चाग्निके तिताम्॥३२॥ देव्युवाच॥ अहमेकादशी स्वामिन् शक्तिरस्मि तव प्रभो
॥ त्वत्तेजसः समुद्भूता तपोरूपा तपस्विनी॥३३॥ त्वयोऽपि पापानि लघूनि च गुरूणि च॥ दैत्यास्त्र
वेष्विजातेषा मस्मि संहारकारिणी॥३४॥ तां प्रसन्नः प्रभुः प्राह त्वं दौ यिद्य दिने नघे॥ आनंदोऽ नृ ॥७३॥

वृजी कर्या वैसात्वे वरस्य मद्धरम्॥३५॥ एकादश्युवाच॥ यदि तुष्टोऽसि मे देव यदि देयो वरो मतः॥
तर्हि मद्व्रतकर्तॄणां सर्वसिद्ध्यतु वांछितम्॥३६॥ उपवासं तु यः कुर्यान्मद्दीये व्रतवासरे॥ सर्वपाप
विनिर्मुक्तो भुक्तिमुक्तिं सचाप्नुयात्॥३७॥ एकभक्तेन नक्तेन तथैवायाचितेन वा॥ योद्यकोपिव्र
तं कुर्यात्सोपिवांछितमाप्नुयात्॥३८॥ त्रिषुलोकेषु भगवंश्चतुर्थापि युगेषु च॥ द्वादशास्वपिमा
सेषु प्रवर्तेत व्रतं मम॥३९॥ चतुर्विंशतिरूपिण्या मम स्वामीत्वमीश्वर॥ भूत्वाऽनेकस्य मां नित्यमि
त्तराद्यान्वितं मम॥४०॥ श्रीभगवानुवाच॥ न देत्वयाव रोमत्तो देवे ज्ञोरपि दुःस्त्वमः॥ याचितो सीतथा
प्यद्यप्रसन्नो हं ददामि ते॥४१॥ अद्यप्रभृति ये केचित्करिष्यंति व्रतं तव॥ मत्प्रजनो सचोपे तं तेषा प्य
तेव वांछितम्॥४२॥ व्रतकर्ता तु मोक्षार्थी मोक्षं प्राप्नोति संस्तुते॥ सांसारिकसुखार्थी च कामान् सर्वा
न्नुह्लिलस्यते॥४३॥ सर्वान्कामानवाप्स्यंति त्वद्व्रतेन यतीनराः॥ भुक्तिदा मुक्तिदा चात्र ख्याता लोके
न विभ्यसि॥४४॥ चतुर्विंशतिसंख्याकैः स्वरूपैकेशवादिभिः॥ चतुर्विंशतिरूपिण्या भविष्यामि प
तिस्तव॥४५॥ श्रीनारायणमुनिरुवाच॥ प्रभोः प्राप्तवरा सैवं सेतुष्टैकादशी गता॥ भगवांस्तु कारया
मास व्रतं तस्याः स्वदासानिजान्॥४६॥ चक्रुस्तन्मुनयः सर्वे बदरीवनवासिनः॥ ततआरभ्य लोकेषु व्र

तमेतस्य वर्त्तते ॥ ४७ ॥ एकादश्यै वरं दत्वा वृत्तं तस्माद्धि भूतले ॥ प्रवर्तयित्वा भगवान्स्वधाम परमं य- 
यौ ॥ ४८ ॥ एकादशी योगनिद्रा विष्णोर्लब्धवरा यदा ॥ तदंशगा सा लक्ष्मी वक्षश्चीकमलं ध्रुवम् ॥ ४९ ॥
तं प्रसक्तं पुनः कर्त्तुं श्वेतद्वीपे मृतस्यजे ॥ तपः प्रियात पो घोरं सा करोच्छतवत्सरान् ॥ ५० ॥ तस्या भ-
क्त्या च तपसा सुप्रसन्नः पुनर्हरिः ॥ तत्समीपमुपेत्याह वरं वरय मत्प्रिये ॥ ५१ ॥ एकादश्युवाच ॥ यदि
प्रसन्नो भवसि प्रभो मयि तदा निजे ॥ एकस्मिन्नेव मासे मे गेहे वासय तल्पे रमामिव ॥ ५२ ॥ श्रीभगवानुवाच ॥
अधः कृत्वा मदंगं तु गरुडेनात्मसात्कृतम् ॥ वक्षो लक्ष्म्या च चक्रादेः शायुधैर्वाह्वोपि मे ॥ ५३ ॥ श्रव-
सी कुंडलाभ्यां च स्वरस्वत्या च मे मुखम् ॥ किरीटेन शिरो रुद्धं नेत्रस्यानंतु नेत्र रवे ॥ ५४ ॥ अतिप्रियस्य-
हिस्यानं नेत्र मुक्तं मनीषिभिः ॥ लक्ष्म्या अतिप्रियासि त्वमतो नेत्रे निवासये ॥ ५५ ॥ आषाढ्यां साषाढमास-
स्य शुक्लाया एकादशी तिथिः ॥ तत आरभ्य मन्नेत्रे मासांस्त्वं चतुरो वस ॥ ५६ ॥ वार्षिकांश्चतुरो मासान्
प्रति वर्षं तपस्विनि ॥ धारयित्वा स्वनयने स्वस्यामि क्षीरनीरधौ ॥ ५७ ॥ त्वं हि नाना तपोरूपा इंद्रियाते-
जसो मम ॥ हंतुं दैत्यं मुरं नाम्ना योगनिद्रासि सुंदरि ॥ ५८ ॥ अब्धौ शेषाहिशायने सा हृता यां मया त्व-
यि ॥ तपस्तव करिष्यंति मद्भक्ता गृहिणोपि हि ॥ ५९ ॥ मत्प्रीतये तपो योगं मत्सूनां चापि ये नराः ॥ चातुर्मा- 

स्ये करिष्यंति सिद्धिः शीघ्रं भविष्यति ॥ ६० ॥ इति दत्वा वरं तस्यै वासुदेवोमृतोदधौ ॥ नेत्रयोर्धारयि-
त्वा तां शेषे शेते वर्मं चके ॥ ६१ ॥ सर्वेंद्रियाणामाहारं तत्त्वहिषय लक्षणम् ॥ वृत्तीस्तेषां समनसां
चकार स्वस्वरूपगाः ॥ ६२ ॥ निराहारे भगवति योगनिद्रामुपेयुषि ॥ निराहाराश्च का शय्या पादसंवा-
हनं रमा ॥ ६३ ॥ सदानंदसुनंदाद्याः पार्षदास्तस्य सर्वशः ॥ क्षीराब्धेरुत्तरे तीरे निराहारास्तपोऽचर-
न् ॥ ६४ ॥ तथा मुनिगणास्तत्र तन्मूर्त्यर्पितदृष्टयः ॥ निर्निमेषमतप्यंत निराहारा जितेंद्रियाः ॥ ६५ ॥
चातुर्मास्ये ततः सर्वैर्यथाशक्ति तपोजनाः ॥ कर्त्तव्यं वासुदेवस्य सहलक्ष्म्या च पूजनम् ॥ ६६ ॥ योगनि-
द्रां तपोरूपां हरावित्यं तु बिभ्रति ॥ स्वापिद्धं ते रुद्रिभक्ताः क्षीराब्धितटवासिनः ॥ ६७ ॥ नो गेहे लापात्म-
तपसा तेषां खिदो भवत्क्वचित ॥ कथं सुखाभिनोवीक्ष्य खिन्नास्ते भक्तभावन ॥ ६८ ॥ भुविमे गज-
हस्तान्निवा तुर्मास्ये बुधाः क्वचित ॥ गृहिणोपि न कुर्वंति कुर्वंस्येव तपस्वतः ॥ ६९ ॥ चातुर्मास्ये खलु
तेषु कार्तिके कादशीदिने ॥ जागर्तिं भगवांस्तर्हि नाम ते ध्रुस वो महान् ॥ ७० ॥ आनंदपूरमं त्रा-
प्य मुनयः पार्षदास्तथा ॥ प्रसेदुस्त्वाः सगणा देवा श्वाश्चर्यं तितं प्रभुम् ॥ ७१ ॥ दिक्षीरनेकीपचारै-
र्वादयंतः स्वपुं दुभीन ॥ योगेश्वरं तमर्चंति लक्ष्म्या मुक्तं सुरास्तदा ॥ ७२ ॥ अत्यानंदो भवत्सेव ब्रसादे

स॰मी॰तृ॰ प्यत्विजेजनाः ॥ एकादश्यामूर्जशुक्लेतत्तीत्तीयाधिकामता ॥ ७३ ॥ एषाजन्मतिथिस्थास्तिसाक्षाद्द अ॰ ३२ ॥
॥ ७५ ॥ र्मस्यमस्पितुः ॥ आद्येयस्तुनिशास्तस्यततोऽपीशाः स्तिनः स्वसु ॥ ७४ ॥ योगेस्मुरेगावासुदेवः शातरस्यां
सहस्त्रिया ॥ पूजनस्यभक्त्यासहितोधर्मदेवोमहामुने ॥ ७५ ॥ एकादश्यपिपथ्यांश्रीराधयासहिता
जनाः ॥ प्रदोषकालेभगवान्प्रोसादामोदरमभिध ॥ ७६ ॥ उपवासोजागरश्चव्रतसत्पादिभिर्ममेः ॥ म
हान्तकार्योद्वादश्यांपुनस्त्रोसरपूजनम् ॥ ७७ ॥ संतर्प्यभगवद्भक्तान्ब्राह्मणांश्चशुभभोजनैः ॥ सहस्वेष्ट
जनैः कार्यव्रतिभिः पारणंततः ॥ ७८ ॥ आरभ्यैकादशीमकादिनानांपंचकंसुराः ॥ महोत्सवंप्रकुर्व
न्तिश्रीराधौमुनिभिः सह ॥ ७९ ॥ दिनपंचककरातस्मिन्ग्रहदोषोविनास्तिवै ॥ ब्राह्मणानामपितत्तो
भवेद्धाहमंगलम् ॥ ८० ॥ प्रबोधन्युत्सवोत्थेयः प्रतिवर्षमहामुने ॥ अवश्यमेवकर्त्तव्यः सर्वव्रतफ
लप्रदः ॥ ८१ ॥ अदृवीयेसंप्रदायेसर्वास्वेकादशीतिथिः ॥ उपोषितव्यापुरुषैर्नारीभिश्चात्मशुद्धये ॥ ८२
एकादशीवासुदेवस्यात्मीयामेक्यतिथिम् ॥ चकाराऽतः सदोषोप्यामुक्तारुमाच्चसाख्विले ॥ ८३
॥ पतिभिर्विधवस्त्राभिस्त्ववियोषोप्याविशेषतः ॥ अस्यापाव्रसहस्त्रप्यातेषांतासांदिनेदिने ॥ ८४ ॥ ए
कादशीनांसर्वासामशक्त्याप्युपोषणे ॥ कुर्युस्तेफलन्मत्कारैरनुकल्पैरपिव्रतम् ॥ ८५ ॥ दशा[illegible]पुरुषा ॥ ७५ ॥

ग्यैस्तुरशक्त्यापोषितोपिच ॥ चातुर्मास्यैकादशिकास्तिरूपोष्याः प्रयत्नतः ॥ ८६ ॥ तत्राप्यशक्तैः पुरुषैः
फलमूलाशनैर्जनाः ॥ विधायतद्व्रतंकार्यंदानपूजासमन्वितम् ॥ ८७ ॥ अपितारग्विधैः पुंभिरूपो
ष्यास्तिस्त्रआदरात् ॥ शयनीबोधनीचैवतृतीयापरिवर्तिनी ॥ ८८ ॥ तासामप्यधिकात्रोक्ताबोधन्या
नंददायिनी ॥ उपोष्यावश्यमखिलैः सकृद्धिर्वाद्युपायिभिः ॥ ८९ ॥ एकेनाप्युपवासेनप्रबोधन्याः कृ
तेनवै ॥ एकादशीनांसर्वासांनिराहारफलंभवेत् ॥ ९० ॥ व्यावहारिकविक्षेपोनयेषांधनिनश्चये
महापूजातुतैः कार्यासर्वास्वेकादशीष्वपि ॥ ९१ ॥ श्रीकृष्णोनिर्गुणोयस्तुसर्वकारणकारणम् ॥
समधमकजरीभूत्यः सर्वलोभउमंडले ॥ ९२ ॥ पंचरात्रप्रसिद्धाभिः शक्तिभिः सहतस्ययाः ॥ मूर्तयः
केशवाद्यास्ताः पूज्यास्तस्मिंमंडले ॥ ९३ ॥ पंचामृतेनस्नपनमभिषेकोमहांस्तथा ॥ महान्नैवेद्यदानं
चमहानीराजनंत्वभो ॥ ९४ ॥ एतत्सर्वंहित्वाश्रीकृष्णकार्यमेकादशीदिने ॥ सर्वत्रकर्तुंयोशक्तः स
चातुर्मास्यआचरेत् ॥ ९५ ॥ तत्राप्यशक्तोबोधन्यांकुर्यादेवमहोत्सवम् ॥ वित्तशाठ्यंनकर्तव्यंधनि
कैस्त्वमामकैः ॥ ९६ ॥ एकादशीतिथिः प्रेष्ठावासुदेवस्यसद्वियः ॥ ततस्तत्रोत्सवः कार्योविशेष
तामहामुने ॥ ९७ ॥ यत्रतांनैवमन्येततिथिंसत्तुमाजनाः ॥ अदृष्टीयाध्वनोवाल्हीभवतीत्सत्वग

॥स॰जी॰तृ॰ म्यताम् ॥ ७९ ॥ कश्यप उवाच ॥ एतन्निशम्यातिमुदं प्रपन्ना महामुने स्तस्य वचो जनास्ते ॥ विधिं व्रतस्या अ॰३२॥
॥ ७६ ॥ स्य चनुस्तवस्तं पुनः स्म पृष्टं तिह हरिं नरेशा ॥ ८० ॥ इति श्री सत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे तत्री
यप्रकरणे श्रीधर्मसुतप्रोक्तैकादश्युत्पत्तितद्व्रतादिनिरूपणनामा द्वात्रिंशोऽध्यायः ॥ ३२ ॥ जनाऊ
चुः ॥ एकादशीव्रतमिदं विधिना केन सन्मते ॥ अस्माभिरिह कर्तव्यं वक्तुमर्हसि तद्विनः ॥ १ ॥ श्रीना
रायणमुनिरुवाच ॥ एकादशीव्रतविधिं स्मृतिवाक्यैः सनिर्णयम् ॥ सदाश्रितेभ्यो वक्ष्यामि स्निग्धे
भ्यो वोऽहमादरात् ॥ २ ॥ उदयात्प्राक् चतस्रस्तु घटिका अरुणोदयम् ॥ पलमात्रमपि त्याज्यं दशम्यास्त
त्र सर्वथा ॥ ३ ॥ शुद्धा विद्धा द्वयी नन्दा त्रिधा न्यूनसमाधिकैः ॥ षट्प्रकाराः पुनस्त्रेधा द्वादश्यूनसमा
धिकैः ॥ ४ ॥ एवमष्टादशविधा प्रोक्ता पूर्वैर्महर्षिभिः ॥ विद्धा यास्तत्र हेयत्वाच्छुद्धायाः किंचिदुच्यते
॥ ५ ॥ आदित्योदयवेलायाः प्राङ्मुहूर्तद्वयान्विता ॥ एकादशी तु संपूर्णा शुद्धा च परिकीर्तिता ॥ ६ ॥ ए
कादशी द्वादशी वाधिका चेत्स्यात्तदा दिनम् ॥ पूर्वं ग्राह्यं तत्परं स्यादिति वैष्णवनिर्णयः ॥ ७ ॥ एकाद
शी यदा तु समा परतो द्वादशी भवेत् ॥ उपोष्या द्वादशी तत्र यदीच्छेत्परमां गतिम् ॥ ८ ॥ दशमीमिश्रिता
पूर्णा द्वादशी यदि लुप्यते ॥ उपोष्या द्वादशी तत्र त्रयोदश्यां तु पारणम् ॥ ९ ॥ संपूर्णैकादशी सा त्याप ॥ ७६ ॥

रतो द्वादशी यदि ॥ उपोष्या द्वादशी तत्र द्वादश्यामेव पारणम् ॥ १० ॥ नवमी पलमेकं स्याद्दशमी पर
तो यदि ॥ उपोष्या द्वादशी शुद्धा त्रयोदश्यां तु पारणम् ॥ ११ ॥ अविद्धैकादशी सा तु द्वादशी वृद्धि
गामिनी ॥ यदा तदोपवासस्तु शक्तैः कार्यो दिनद्वये ॥ १२ ॥ द्वादश्यामेव चाशक्तैर्विष्णुभक्तैरुपो
षणम् ॥ कर्तव्यं सोऽस्रवं भक्तरा द्वादश्यामेव पारणम् ॥ १३ ॥ एकादशीमुपोष्याथ द्वादशीं समुपो
षयेत् ॥ न तत्र विधिलोपः स्यादुभयोर्देवता हरिः ॥ १४ ॥ दशमी पंचपंचाशद्घटिका यावदेव हि ॥ ता
वन्न दशमीवेधः प्रोक्तः प्रोक्तस्तदूर्ध्वतः ॥ १५ ॥ एवमेव हि गोस्वामी विट्ठलेशमतं ततः ॥ मदीयैर्वि
ष्णुभिस्तदेव ग्राह्यमादरात् ॥ १६ ॥ वृद्धावप्यविरोधे च संदेहे च तिथेर्विदाम् ॥ उपोष्या द्वाद
शी शुद्धा त्रयोदश्यां तु पारणम् ॥ १७ ॥ अथ प्रमादेन शुद्धैकादश्युपवासातिक्रमे निर्णयः ॥ एकादशी
प्रमादेन विस्मृता स्याद्यदा तदा ॥ परेऽह्नि द्वादशीमेव समुपोष्य व्रतं चरेत् ॥ १८ ॥ अथोपवासस्व
रूपम् ॥ एकादशीन्द्रियाणां यत्तद्विषयजक्षणम् ॥ हित्वाहारं वासुदेवसन्मुखत्वमवस्थितम् ॥ १९
॥ एकादशीव्रतं स्यैतन्मुख्यं भवति लक्षणम् ॥ उपवासो निराहाररूप एवमतो बुधैः ॥ २० ॥ उपावृ
त्तस्य पापेभ्यो यस्तु वासो गुणैः सह ॥ उपवासः स विज्ञेयः सर्वभोगविवर्जितः ॥ २१ ॥ नजपाजप

॥सं॰जी॰द॰॥ नैधानैतत्कथाश्रावणादयः॥ उपवासकृतामेते गुणाः प्रोक्ता मनीषिभिः॥२२॥ अथैकादशीव्र ॥अ॰२३॥
॥७३॥ तिधर्माः॥ क्षमा सत्यं दया शौचं दानमिंद्रियनिग्रहः॥ देवपूजाग्निहवनं संतोषः स्तेयवर्जनम्॥
२३॥ एकादश्यां ब्रह्मचर्यमहिंसा रसवर्जनम्॥ सर्वव्रतेषु सामान्या धर्मा एते च षोडश॥२४॥ स्मृति
श्चालोकनं गंधः स्वादनं चापि कीर्तनम्॥ अन्नस्य सर्वथा वर्ज्यमुपवासं प्रकुर्वता॥२५॥ पतिता
न्नास्तिकान्हिंस्रान्नसज्जनान्वेदनिंदकान्॥ नाभिभाषेत नेक्षेत न स्पृशेच्च व्रती नरः॥२६॥ अना
तुरे सकृन्नैव पिबेत्तोयं व्रती क्वचित्॥ इंद्रियक्षोभजननं न भक्षयेन्न च किंचन॥२७॥ गात्राभ्यंगं शि
रोभ्यंगं तांबूलं चानुलेपनम्॥ व्रतस्थो वर्जयेद्देवगृहादौ गायनं तथा॥२८॥ अथ व्रतघ्नानि॥ स्त्री
णां संप्रेक्षणात्स्पर्शात्ताभिः संकथनादपि॥ विपद्यते ब्रह्मचर्यं स्वदारेष्वपि संगमात्॥२९॥ मासस्या
वत्सपकार्यैनाचरेत्तु परस्त्रिया॥ स्पर्शो वापदि संवृत्ते न दोषो गृहिणां स्मृतः॥३०॥ असकृज्जल
पानाच्च सकृत्तांबूलचर्वणात्॥ उपवासः प्रणश्येत दिवास्वापाच्च मैथुनात्॥३१॥ अश्रुपातो रोष
श्च कलहस्य कृतिस्तथा॥ पुरुषं च स्त्रियं सद्यो व्रताद्भ्रंशयति ध्रुवम्॥३२॥ दानं व्रतं च नियमाः स्नानं
ध्यानं कृतजपः॥ यत्नेनापि कृतं सर्वं क्रोधितस्य वृथा भवेत्॥३३॥ अथ व्रतनियमच्युतौ प्रायश्चित्त ॥७३॥

म्॥ मिथ्यावादे दिवास्वापे बहुशोंबुनिषेवणे॥ अष्टाक्षरं व्रती जप्त्वा स्नात्वा शुध्येद्दशोत्तरं शतम्॥३४
स्त्रीनास्तिकहिंस्रादिभाषणादौ व्रती पुमान्॥ अष्टाक्षरं जपेत्स्नात्वा शतत्रयमुदङ्मुखः॥३५॥ अ
थ प्रायश्चित्तापरिहार्याणि व्रतघ्नानि॥ तांबूलमद्यमांसादिभक्षणे मैथुने तथा॥ ग्राम्यवार्ताप्रक
थने गालिदाने च ताडने॥३६॥ तमाजन्मक्षेमरकृच्छ्रे च द्यूतदेवने॥ अज्ञानादपि संजाते व्रत
लोपो भवेद्ध्रुवम्॥३७॥ विभिन्नत्वे कायायाः स्पर्शास्तु भवेत्स्युः सोपि यावदा॥ तस्याः पुंसोपि च स्पर्शो व्रत
लोपस्तदोभयोः॥३८॥ बुद्धिपूर्वं वीर्यपातः पुंसः स्वप्ने च नो भवेत्॥ तदापि व्रतलोपः स्यात्तस्मान्न
छिन्नयाः क्रियाः॥३९॥ अथाव्रतघ्नानि॥ अष्टावेतान्यव्रतघ्नानि जलं मूलं फलं पयः॥ हविर्ब्राह्मण
काम्या च गुरोर्वचनं मौषधम्॥४०॥ सर्वभूतभयेनाप्यव्याधिनाऽज्ञानतोपि वा॥ व्रतभंगो यदि भवे
त्तर्हि दोषो न विद्यते॥४१॥ अथ गृहीतव्रतत्यागे प्रायश्चित्तम्॥ पूर्वं व्रतं गृहीत्वा यो नाचरेत्काममोहि
तः॥ जीवन्भवति चांडालो मृतः श्वा च प्रजायते॥४२॥ क्रोधात्प्रमादाल्लोभाद्वा व्रतभंगो भवेद्यदि॥ दि
नत्रयं न भुंजीत मुंडनं शिरसोऽथवा॥४३॥ अथ व्रतविघ्ने निर्णयः॥ जाताशौचे मृताशौचे व्रतप्रारंभ
तः पुरा॥ प्राप्तेपि संव्रतं कुर्याद्दानार्चादिविवर्जितम्॥४४॥ उपावसंस्थ नियमान्पालयन्स्तुत

॥स॰नी॰टी॰ कीस्वयम्॥ व्रतांगदेवपूजादिकार्यं द्विजेन वै॥ ४५॥ प्रारब्धे च व्रते जाते सूतके तु व्रती स्वयम् अ॰२३॥
॥१८॥ ॥ स्नात्वा व्रतांगदेवस्य भक्त्या कुर्वीत पूजनम्॥ ४६॥ नारी रजोदर्शने तु कृत्वा स्वयमुपोषणम्॥ देवा
र्चनादि चान्येन कारयेत्प्रयता व्रते॥ ४७॥ व्रतोपवासदिवसे स्यादप्राप्तौ तु पुरुषः॥ क्षिप्रमन्नमुपा
घ्राय कुर्वीत व्रतमादरात्॥ ४८॥ वैष्णवैस्तु विशेषेण प्राप्तमेकादशीव्रतम्॥ द्वादश्यामेव कर्त्तव्यं पि
तरो वै प्रत्यवायतः॥ ४९॥ गर्भिणी रोगिणी वृद्धा सूतिका वापदं गता॥ अन्येनैव व्रतं तस्या यं कारये
न्न तु हापयेत्॥ ५०॥ अथ स्वस्वव्रताचरणाशक्तौ प्रतिनिधयः॥ भार्या पत्युर्व्रतं कुर्याद्भार्यायाश्च प
तिर्व्रतम्॥ तदभावे परस्त्वान्यो व्रते प्रतिनिधिर्मतः॥ ५१॥ पुत्रं शिष्यं विनीतं वा भगिनीं भ्रातरं च वा
एषामभावे विप्रं वा व्रते स्वस्य नियोजयेत्॥ ५२॥ पितृमातृपतिभ्रातृगुर्वर्थं च विशेषतः॥ यः कुर्या
दुपवासं स पुण्यं शतगुणं व्रजेत्॥ ५३॥ उपवासासमर्थो वा विप्रमेकं सुभोजयेत्॥ तावद्धनं च वा द
द्याद्भुक्तस्याद्विगुणं पुमान्॥ ५४॥ सहस्रसंमितां देवीं जपेद्वा प्राणसंयमान्॥ कुर्याद्द्वादशसंख्याका
न्यथाशक्त्या तु वै नरः॥ ५५॥ शारीरान्नियमांस्तत्र कर्तुं कारयितान्यथा॥ याजयेत्सत्कृत्यान्यं भक्त्या ब्रा
ह्मणं वा यथा भवेत्॥ ५६॥ अथ व्रतविधिः॥ तत्रादौ दशमीकृत्यम्॥ कांस्यं मांसं मसूरांश्च चणकान् ॥१८॥

कोरदूषकान्॥ शाकं मधु परान्नं च पुनर्भोजनमैथुने॥ ५७॥ द्यूतमत्यम्बुपानं च स्पृशा वार्त्तं तथा कृति
म्॥ गंधतांबूलपुष्पादि दशम्यां वैष्णवस्त्यजेत्॥ ५८॥ अत्याहारमसत्संगमनृतं च दिवास्वप्न
॥ तजेत्स्त्रीचेष्टितं शिश्नविदाकादि विषयोज्झितः॥ ५९॥ अथोपवासनियमग्रहणम्॥ दिवा दशा
म्यां लघु तु कृत्वा स्नात्वाभ्यर्च्य हरिं निशि॥ उदङ्मुखो व्रतं तस्माद्गृह्णीयान्नियमं नरः॥ ६०॥ एकाद
श्यां तु वा प्रातर्दन्तधावनपूर्वकम्॥ स्नात्वोपवासनियमं गृह्णीयात्सन्निधौ हरेः॥ ६१॥ तत्र मंत्रः॥ ए
कादश्यां निराहारः स्थित्वाहमपरेऽहनि॥ भोक्ष्यामि पुंडरीकाक्ष शरणं मे भवाच्युत॥ ६२॥ अथैका
दशीदिनकृत्यम्॥ रजन्यामंतिमे यामे समुत्थाय हरिं हृदि॥ ध्यात्वा शरणमभ्येत्य कुर्याच्छौचवि
धिं पुमान्॥ ६३॥ न दंतधावनं कार्यं काष्ठेनैकादशीदिने॥ अपां द्वादशगंडूषैः पर्णाद्यैः शोधये
न्मुखम्॥ ६४॥ स्नात्वा स्वं नैत्यकं कर्म विधाय सुसमाहितः॥ शक्त्या संभृतसंभारः कुर्यात्कृष्णमहा
र्चनम्॥ ६५॥ व्रतकर्त्ता पुमानर्चेदेकादश्यधिपैः सह॥ सशक्तिमिश्रश्रीकृष्णं रुक्मिणीकांतमाद
रात्॥ ६६॥ एकादशीस्वामिनाम्ना कृष्णं वैकं समर्चयेत्॥ तच्छक्तिनाम्ना लक्ष्मीं च भक्त्या शक्त
स्तु पूरुषः॥ ६७॥ अथ प्रत्येकमेकादश्यधिपदेवदेव्यादिनामानि॥ मार्गशीर्षशुक्लपक्षे मोक्षदैकादशी

स॰ त्री॰ तृ॰
॥ ७५ ॥

मता॥ पूजनीयश्च मालत्या केशवो वधिष्णिया सह॥ ६८॥ अर्घ्यं फलेन तु नारंगनैवेद्यं मोदकास्तथा
॥ सप्तधान्यानि देयानि मुख्यान्यत्रोदितानि वै॥ ६९॥ मार्गशीर्षे कृष्णपक्षे सफलैकादशी मता॥ सं
कर्षणोऽत्र संपूज्यः सुनंदासहितः प्रभुः॥ ७०॥ पूजायां मुनिपुष्पाणि नैवेद्यं गुडकाः मताः॥ अत्रा
र्घ्ये चाम्रतफलं स्वर्णदानं च कथ्यते॥ ७१॥ पौषे शुक्ला तु सानंदा कथितैकादशी तिथिः॥ नाराय
णोऽत्र संपूज्यः पद्मया सह भक्तितः॥ ७२॥ कुंभाम्बुकानि पुष्पेषु चूर्णं नैवेद्यमत्र च॥ अर्घ्यं च दाडि
मफलं देयं च घृतपात्रकम्॥ ७३॥ एकादशी पौषकृष्णा तिलदाख्या च कीर्तिता॥ नम्पां श्रीप्रिय
या सार्कं वासुदेवोऽर्च्यते॥ ७४॥ कूष्माण्डपत्रपुष्पाणि नैवेद्यं घृतपूरकाः॥ जंबीराख्यफलं चा
र्घ्ये वस्त्रदानमिहोत्तमम्॥ ७५॥ माघशुक्ला जयानाम्नी कथितैकादशी तथा॥ नित्यया सह संपूज्यो
माधवस्तत्र सुस्वरः॥ ७६॥ पुष्पेषु बकुलान्यत्र बीजपूरं निवेदने॥ मंडकाश्चात्र दाने च तिलद्रोणः प्र
कीर्तितः॥ ७७॥ एकादशी माघकृष्णे विजयाख्याय कथ्यते॥ प्रद्युम्नोऽत्र तिथिस्तत्र पूजनीयो धिया
सह॥ ७८॥ पूजायां तुलसी मुख्या नात्र जंबीरमर्हति॥ मोहालिकाश्च नैवेद्ये दाने तू पानहौ मते॥ ७९
एकादशी फाल्गुने च शुक्ला धात्रीति कीर्त्यते॥ गोविंदं पूजयेत्तत्र चंद्रवत्या सह व्रती॥ ८०॥ मंदाराण ॥ ७५ ॥

ॐरुद्र ॥

त्र पुष्पेषु केसारश्च निवेदने॥ तिलपात्रं तथा दाने ज्ञेयमक्षोरमर्हति॥ ८१॥ एकादशी फाल्गुने च
कृष्णोक्ता पापमोचनी॥ अनिरुद्धः पूजनीयः सुशीलासहितस्त्विह॥ ८२॥ कुंदपुष्पाणि पूजायां से
वाश्चोक्ता निवेदने॥ कर्कटफलमर्घ्येऽत्र दाने च तिलगौर्मता॥ ८३॥ एकादशी चैत्रशुक्ले विमलाख्या
प्रकीर्तिता॥ कामदाख्या च सैवोक्ता सर्ववांछितदायिनी॥ ८४॥ रमयासहितः शक्त्या तत्र विष्णुस्तु
पूज्यते उपचारैः षोडशभिर्यथावित्तं यथाविधि॥ ८५॥ अर्घ्ये फलं त्विर्मदाख्यमात्र पुष्पं च पूजने
नैवेद्ये सक्तवश्चात्र दाने पक्वान्नमीरितम्॥ ८६॥ एकादशी कृष्णपक्षे चैत्रे प्रोक्ता वरूथिनी॥ नंदया
सहितः शक्त्या तत्रार्च्यः पुरुषोत्तमः॥ ८७॥ अर्घ्ये जातीफलं प्रोक्तं नैवेद्ये वटकास्तथा॥ चंपकानि च
पुष्पेषु तत्र दाने च भूर्मता॥ ८८॥ एकादशी मोहिनी च वैशाखस्य सितोदिता॥ माधव्या सह संपूज्यस्त
त्रांतु मधुसूदनः॥ ८९॥ पुष्पेषु मल्लिका त्रोक्ता नैवेद्ये पायसं तथा॥ अर्घ्ये फलं चनसं शस्यं
दानं च कीर्त्यते॥ ९०॥ एकादश्यपराख्या वैशाखस्यासिता मता॥ केतकैः पूजनीयोऽत्र सह लक्ष्म्या
त्वधोक्षजः॥ ९१॥ अर्घ्ये बकुफलं प्रोक्तं दुग्धौदननिवेदनम्॥ सवत्सायाश्च गोर्दानं ब्राह्मणायोदित
त्विह॥ ९२॥ एकादशी निर्जलाख्या ज्येष्ठशुक्लेन प्रकीर्तिता॥ पद्माक्ष्या सह संपूज्यस्त्रिविक्रमः प्रभुः

स॰नी॰नृ॰ ९३॥ पुष्पेषु यूथिकामुख्या अर्घ्ये जाम्रफलं मतम्॥ नैवेद्ये दधिभक्तं च दाने छत्रं प्रकीर्तितं॥ ९४॥ ए- अ॰ २२॥
॥ ८६॥ कादशी मिथुने कृष्णा योगिनी संज्ञिका मता॥ क्षेमकर्या सहाभ्यर्च्यो नृसिंहाकृतिरीश्वरः॥ ९५॥ भृंगरा-
जोत्र पुष्पेषु प्रोक्तो अर्घ्ये जाम्बवं फलम्॥ नैवेद्ये पिंडिकाः प्रोक्ता दानं च जलगोर्मतम्॥ ९६॥ आषाढे शु-
क्लपक्षेर्य शयन्येकादशी मता॥ वामनः कमलायुक्तः पूजनीयोत्र भक्तितः॥ ९७॥ अपामार्गोत्र पुष्पे-
षु नैवेद्ये पूरिकास्तथा॥ नारिकेरीफलं त्वर्घ्ये दानं च स्वर्णगोर्मता॥ ९८॥ आषाढ कृष्णपक्षे च का-
मिकैकादशी मता॥ अच्युतो विजयायुक्तः संपूज्यस्तत्र भक्तितः॥ ९९॥ पुष्पेषु पारिजातानि बिल्व-
मर्घ्ये फलं मतम्॥ शालिडिंडं च नैवेद्ये दानं स्त्रीपुंसवस्त्रयोः॥ १००॥ एकादशी पुत्रदाख्या श्रावणस्य
सिता मता॥ श्रीधरः पूजनीयोत्र कांतिमत्या सहैव च॥ १०१॥ शतपत्राणि पुष्पेषु नैवेद्ये घृतपक्कालि-
ह॥ प्रोक्ताः सीताफलं चार्घ्ये पादुकादानमुत्तमम्॥ १०२॥ अजाख्या श्रावणे मासि कृष्णैकादश्युदीरि-
ता॥ कंदर्पा च सहैवार्च्यस्तस्यां देवो जनार्दनः॥ १०३॥ पुष्पेषु पाटल्या मुख्या अर्घ्ये पूगीफलं मतम्॥ दा-
ने च महिषी प्रोक्ता नैवेद्ये गुडमोदकाः॥ १०४॥ एकादशी भाद्रपदे शुक्ला पद्माभिधा मता॥ हृषीकेशो-
त्र संपूज्यो लक्ष्म्या पराजितया सह॥ १०५॥ काशपुष्पाणि पूजायां तिलपिंडं निवेदने॥ कूष्मांडमर्घ्ये विज्ञेयं दा- ॥ ८० ॥

ने ब्रह्मपुरी मता॥ १०६॥ एकादशी भाद्रपदे कृष्णा च कथितेंदिरा॥ उपेंद्रः सुभगायुक्तः पूज्यो हवीभि-
रत्र तु॥ १०७॥ अर्घ्ये श्रीफलं प्रोक्तं कदली वेष्टं निवेदने॥ कन्यादानं तु पात्रोक्तं व्रतसांगफलाप्त-
ये॥ १०८॥ एकादश्याश्विने मासि शुक्ला पापांकुशाभिधा॥ पद्मनाभः पद्मया सह पूज्योत्र भक्तितः
॥ १०९॥ शमीपत्राणि पूजायामर्घ्ये काम्रफलं मतम्॥ शालिपिष्टं च नैवेद्ये दाने प्रोक्तास्तु मोदकाः
॥ ११०॥ आश्विने कृष्णपक्षे तु रमाख्यैकादशी मता॥ हिरण्यपासहाभ्यर्च्यो हरिस्तस्यां मधीश्वरः॥ ११-
१॥ पुष्पेषु मुचुकुंदा मिलत्राप्यर्घ्ये कदलं मतम्॥ नैवेद्ये पिच्छलवाश्च दानं घृतघटस्य च॥ ११२॥ कार्तिके
शुक्लपक्षे तु बोधन्येकादशी मता॥ राधया सह संपूज्यस्तत्र दामोदरः प्रभुः॥ ११३॥ पद्मपुष्पाणि पू-
जायां पुष्पान्नं निवेदने॥ शुष्कचूर्णपयफलमर्घ्ये दंपत्युमंचकः॥ ११४॥ कार्तिके कृष्णपक्षे स्यादे-
कादश्युत्पन्नाभिधा॥ कृष्णः सुलक्षणोपेतः पूजनीयोत्र च प्रभुः॥ ११५॥ तिलपुष्पाणि पूजायां नैवेद्ये च
गुडौदनः॥ शालीं सदाफलं चार्घ्ये तत्र देयो वृषो मतः॥ ११६॥ एकादश्याधिके मासि कमलाख्या च तत्स-
तिः॥ पुरुषोत्तमः समुक्तो विधिस्तन्मासिकोपरः॥ ११७॥ रसैकादशिका धीशा मया प्रोक्ताः महाभक्तिका-
स्तत्पूजाविशेषश्च पूजकेप्सितपूरकः॥ ११८॥ अजामेत्रकृत्वं संज्ञां सर्वास्वेकादशीष्वपि॥ कार्या पूजा

॥स॰ जी॰ त्॰॥ यथाशक्ति यथालब्धोपचारकैः ॥११९॥ फलं पूंगीफलं देयं पुष्पं च तुलसीदलम् ॥ नैवेद्यं शर्कराः अ॰ ३३॥
॥८१॥ खंडैर्दानैर्वान्नं स्वशक्तितः ॥१२०॥ आनुकूल्येन मतिमाननुकूल्येन कर्हिचित् ॥ गृह्णीयाद्धितजी-
वेन प्रमादाच्चापनादरात् ॥१२१॥ प्रतिमां कारितां शक्त्या श्रीकृष्णस्य सहश्रियः ॥ हेमादिभिर्जयेद्भक्त्या
सर्वलोकमहोत्सवे ॥१२२॥ चतुर्विंशतिसंख्याकैः पूर्वोक्तैः केशवादिभिः ॥ नरादिभिः पार्षदैश्च युक्तमर्चेज्ज-
सहश्रियम् ॥१२३॥ अशक्तस्त्वेकमप्येवं तु जाग्रदर्चां व्रजे ॥ श्रीकृष्णं सन्निवेश्याथ भक्त्या यथालब्धोप-
चारकैः ॥१२४॥ एकादश्यधिपो यः स्यात्तन्नाम्ना कृष्णमर्चयेत् ॥ तस्य शक्तिर्भवेद्यावत्तन्नाम्ना रुक्मि-
णीं तथा ॥१२५॥ एकादश्यधिपाः सर्वे कृष्णस्यैकस्य पूजया ॥ पूजिताः स्युः शक्तश्चेत्तेषां नाम्ना स्तु पू-
जया ॥१२६॥ स्थापयित्वाऽव्रणं कुंभं रत्नगर्भं सकांचनम् ॥ वस्त्रेण वेष्टिते तस्मिन् स्थापयेत्ताम्रमुत्त-
मम् ॥१२७॥ कमंडलुं दशादलं कृत्वा तत्र सुशोभनम् ॥ तत्रार्चां सन्निवेश्यैव कृष्णं स्थापयित्वा यथाविधि ॥१२८
॥ उपचारैः षोडशभिर्महापूजां समाचरेत् ॥ लघुपूजामशक्तस्तु भक्त्या कुर्वीत पूरुषः ॥१२९॥ संहितोक्तैर्वैदि-
कैर्मंत्रैर्द्विजः पूजनमाचरेत् ॥ देशकालादि संकीर्त्य मंत्रानेतांश्च कीर्तयन् ॥१३०॥ अथैकादशीपूजा-
विधिः ॥ तत्रादौ ध्यानम् ॥ तेजोमेरुजमध्यस्थं कोटिकंदर्पसुंदरम् ॥ नवीननीरदश्यामं पीतांबरधरं प्र- ॥८१॥

भुम् ॥१३१॥ दक्षिणे पाणिना चक्रं शंखं वामेन बिभ्रतम् ॥ रमया सेवितं धामे दिव्यपंकजहस्तया ॥ ५१
१३२॥ अनेकदिव्यालंकारं वनमालाविभूषितम् ॥ उपास्यमानं प्रयतैः पार्षदैर्गरुडादिभिः ॥१३३
॥ स्तूयमानं मुनिगणैर्देवगंधर्वकिन्नरैः ॥ कृष्णमेवंविधं ध्यात्वा ततः पूजनमाचरेत् ॥१३४॥ इति
ध्यानम् ॥ आवाहनीयं देवेश भक्तानामभयप्रदम् ॥ सुस्निग्धं वरदेशं तं मनसावाहयाम्यहम् ॥१३५
॥ आवाहनम् ॥ स्वर्णमणिभिर्दिव्यैः खचिते देवनिर्मिते ॥ दिव्यसिंहासने स्निग्धे निषीद त्वं सुरा-
धिप ॥१३६॥ आसनम् ॥ गंगोदकं सुरश्रेष्ठ सुवर्णकलशे स्थितम् ॥ गंधपुष्पाक्षतैर्युक्तं गृहाण
रमया सह ॥१३७॥ पाद्यम् ॥ देवदेव नमस्तुभ्यं पुराणपुरुषोत्तम ॥ मयादत्तमिदं तोयं गृह्णीष्वाचम-
नीयकम् ॥१३८॥ आचमनम् ॥ पयोदधिघृतं चैव मधुशर्करयायुतम् ॥ पंचामृतेन स्नपनं प्रीत्यर्थं प्र-
तिगृह्यताम् ॥१४०॥ पंचामृतस्नानम् ॥ कामधेनुसमुद्भूतं सर्वेषां जीवनं परम् ॥ पावनं यज्ञहेतुश्च प-
यः स्नानार्थमर्पये ॥१४१॥ पयःस्नानम् ॥ पयसस्तु समुद्भूतं पदस्तुदध्यशोगतः ॥ दध्यानीतं मया देव
स्नानार्थं प्रतिगृह्यताम् ॥१४२॥ दधिस्नानम् ॥ नवनीतसमुत्पन्नं सर्वसंतोषकारकम् ॥ यज्ञांगं देवता-
हारं घृतं स्नानार्थमर्पये ॥१४३॥ घृतस्नानम् ॥ इक्षुसारसमुद्भूतं सर्वतेजोविवर्धनम् ॥ सर्वपुष्टिक-

॥स.गी.टी.॥
॥८२॥

करं देव मधुस्नानार्थमर्पये ॥२४४॥ मधुस्नानम् ॥ इक्षुसारसमुद्भूतां शर्करां सुमनोहराम् ॥ मलाप- अ० ३३॥
हारिणीं स्नातुं गृहाण त्वं मयार्पिताम् ॥२४५॥ शर्करास्नानम् ॥ नदीनां चैव सर्वासामानीतं जलमुत्तमम्
गृहाण स्नानयं चेतत्प्रभो स्नानीयमर्पितम् ॥२४६॥ स्नानम् ॥ वस्त्रयुग्मं गृहाण त्वं पट्टसूत्रेण निर्मित-
म् ॥ सूक्ष्मं कार्पासतंतूनां सुवर्णेन विराजितम् ॥२४७॥ वस्त्रम् ॥ नारायण नमस्तेस्तु पाहि मां भवसाग-
रात् ॥ ब्रह्मसूत्रं सोत्तरीयं गृहाण पुरुषोत्तम ॥२४८॥ यज्ञोपवीतम् ॥ केयूरमुकुटे चैव नूपुरे रंगुलीय-
कैः ॥ भूषितोसि प्रियत्नेन रत्नैराभरणैर्विभो ॥२४९॥ आभरणानि ॥ चंदनं मलयोद्भूतं कस्तूर्यागुरु
संयुतम् ॥ कर्पूरेण च संमिश्रं स्वीकुरुष्वानुलेपनम् ॥२५०॥ गंधम् ॥ शतपत्रैः कर्णिकारैः सुपंकजैर्म-
ल्लिकादिभिः ॥ पुष्पैर्नानाविधैश्चैव पूजयामि सुरेश्वर ॥२५१॥ पुष्पाणि ॥ दशांगसंज्ञितं धूपं सुगं-
धं च मनोहरम् ॥ गृहाण देवदेवेश मया भक्त्या समर्पितम् ॥२५२॥ धूपम् ॥ एकार्तिकां सुरश्रेष्ठ गोघृ-
तेन सुवर्तिना ॥ संयुक्तां तेजसा रूपं गृहाण सुरपूजित ॥२५३॥ दीपम् ॥ अन्नं च पायसं भक्ष्यं सिता-
लेह्यसमन्वितम् ॥ दधिक्षीरघृतैर्युक्तं गृहाण सुरवल्लभ ॥२५४॥ नैवेद्यम् ॥ नागवल्लिदलैर्युक्तं पूं-
गीफलसमन्वितम् ॥ कर्पूरखदिरोपेतं तांबूलं प्रतिगृह्यताम् ॥२५५॥ तांबूलम् ॥ बीजपुराम्रपनस- ॥८२॥

खर्जूरीकदलीफलम् ॥ नालीकेरफलं दिव्यं गृहाण भगवन्निदम् ॥२५६॥ फलम् ॥ न्यूनातिरिक्तपूजा-
याः संपूर्णफलहेतवे ॥ दक्षिणां कांचनीं देव स्थापयामि तवाग्रतः ॥२५७॥ दक्षिणाम् ॥ नीराज-
नं गृहाणेश पंचवर्तिसमन्वितम् ॥ तेजोराशे मया दत्तं लोकानंदकर प्रभो ॥२५८॥ नीराजनम् ॥ ज-
य देव जय देव जय मंगलदाता २ लक्ष्मीवर राधावर २ शरणागतपाला ॥ ध्रुवपदम् ॥ हर्तुं भारमव-
न्या जातोभुवि विष्णु ॥ २ ॥ दैत्यजालीकमनेकं २ जयनिष्पसहजिष्णुः भीष्मकतनयावरणे विधि-
सुरपतिमुख्यै २ शमित्रिविष्टपाधिपतिस्त्वं २ नरपतिगणमुख्यैः ॥२५९॥ जयदेव ॥ पार्थप्रेमवशात्त्वं ब-
कधातुरिति वा २ नवसोनन्नुभवसि त्वं २ जीवनमपि तेषाम् ॥ भीतं विदधत्विनयं प्रतिमदनृपसं-
धे २ दुर्जयमुक्तिनशास्त्रो २ ष्वकरोः सुरसंधैः ॥२६०॥ जयदेव ॥ नूनं पांडवपत्न्यास्त्वयि कृतवक्रवाने
२ प्रेमा कामं रणविद्यां २ निरदधिर्तितिनाने ॥ निःस्पृहमुक्तपतिस्त्वं विवशो द्विजनारी २ यस्यास्त्वयपा-
त्वं तमात्रो २ हित्वा कमलादिम् ॥२६१॥ जयदेव ॥ वासुपानमुनिगीतं प्रथमं रमसमतिलं २ गोपीषु
च भामायां २ विदधियतं संफलमला कंदेव कलत्रैर्निजललना संधैः २ केलिं चां बुधिवारिणि २
यसुरमुनिसंघे ॥२६२॥ जयदेव ॥ चंचलकुंडलकिरीटं नवजलदश्यामं २ मकरानन्यस्तुतिभुवना भीप

॥ स॰ जी॰ टी॰ ॥ ८३ ॥

शितगममसृखवर्णद्युतिवसनं त्वां दधतं च नवीनं॰ वंदे हारिजकंदं॰ दृशिमोदितदीनम् ॥ २६२ ॥ जय श्री॰ ३३ ॥
देव॰ ॥ मल्लानीराजनम् ॥ अंजलिस्थानि पुष्पाणि वा यथा मिलगत्स्यते ॥ स्वशरणमुमुक्षो भूत्वा जग
दानंददायक ॥ २६४ ॥ पुष्पांजलिम् ॥ नमस्ते देवदेवेश नमस्ते गरुडध्वज ॥ नमोस्तु विश्वमवे तुभ्यं व्र
तस्य फलदायक ॥ २६५ ॥ पद्भ्यां कराभ्यां जानुभ्यां उरसा शिरसा दृशा ॥ वचसा मनसा चेति प्रणा
मोष्टांग ईरितः ॥ २६६ ॥ बाहुभ्यां चैव जानुभ्यां शिरसा वचसा दृशा ॥ पंचांगोयं प्रणामः स्यात् पूजासु
प्रवराविमौ ॥ २६७ ॥ नत्वाष्टांगः प्रणामस्तु पुंसामेव हितो मतः ॥ अन्यः स्त्रीणां न चाप्यस्त्रीणां सर्वेषा
मपि संमतः ॥ २६८ ॥ प्रणमेद्दक्षिणे भागे किंचिद्दूरे तु संस्थितः ॥ कराभ्यां दक्षवामाभ्यां पादौ गृह्णी
न् स्वरेः क्रमात् ॥ २६९ ॥ प्रतिनमस्कारविधिः ॥ अथ प्रार्थना ॥ गोविंद माधव दयाजलदीनबंधो श्री
मन्मनोनयनमंदन दिव्यमूर्ते ॥ दिव्यैर्जनीजनमतिकांति मनोहरांग श्रीरुक्मिणीरमण मामव
वासुदेव ॥ २७० ॥ कंसादिदुष्टदमन प्रणतैकबंधो कामांधकादितनुशंखरथांगपाणे ॥ श्रीद्वा
रिकापुरपुरंदर पूर्णकाम श्री॰ ॥ २७१ ॥ आनंदकंद यदुनंदन नारदीयहृत्तीर्थ बिंबवदनांबुजमंद
हास ॥ भूभारराजवजनाशनशेषबंधो श्री॰ ॥ २७२ ॥ भामानुरंजनसमाहृतपारिजात प्रद्युम्न ॥ ८३ ॥

तातपुरुहूतसभासदस्य ॥ पत्र्यंगनादिगुणितास्यमहस्त्रकांतश्री॰ ॥ २७३ ॥ आत्मीयपोरवहितैरनजि
ष्णुसूत कृष्णामनोभिलषितप्रदकल्पवृक्ष ॥ देवेंद्रवैरगरुरध्वजशार्ङ्गपाणे श्री॰ ॥ २७४ ॥ धर्माध्व
सेतुरचनोद्युतनिसदानैःसंतर्पितद्विजवरौघहरे मुरारे ॥ श्रीनारदादिमुनिगीतपवित्रकीर्ति श्री
॰ ॥ २७५ ॥ कारुण्यसागर नवांबुधिपारदायिन् कल्याणरूपसितपावननामधेय ॥ ब्रह्मेशपूर्वदेवन
रदेवशिखामणे त्वं श्री॰ ॥ २७६ ॥ संसारसिंधुशरणागतजीवरक्षानिर्मोहतोर्चुवममर्पितनैजबुद्धे
॥ नानावतारपरिपालितसाधुलोक श्री॰ ॥ २७७ ॥ अन्यथा शरणं नास्ति त्वमेव शरणं मम ॥ तस्मात्कारु
ण्यभावेन रक्ष रक्ष परमेश्वर ॥ २७८ ॥ इति प्रार्थना ॥ ततः पूजांगतासिद्ध्यै वायनप्रदानम् ॥ परमान्नमि
दं दिव्यं काम्यपात्रेण संयुतम् ॥ बाणकं द्विजवर्याय सहिरण्यं ददाम्यहम् ॥ २७९ ॥ इति वायनदानमं
त्रः ॥ इति संपूज्य संप्रार्थ्य दिवाशेषं नयेत्ततः ॥ श्रीमन्नारायणकथाकीर्तनश्रवणादिभिः ॥ २८० ॥
न व्यावहारिकं कर्म कार्यमेकादशीदिने ॥ अंदवीयैर्नरभिः स्त्रीभिः किंचिद्दायदं विना ॥ २८१ ॥ कर्पु
रैर्नरैर्द्विजैः कार्या बालभिः पणानं न च ॥ न क्रयो विक्रयश्चापि कार्यः कस्यापि वस्तुनः ॥ २८२ ॥ स्त्रीभिः
शौकौसेदं नं च न कार्यं सूत्रकर्तनम् ॥ नच थाभाषणं कार्यं नास्त्रद्रपत्स्पर्शनादि च ॥ २८३ ॥ हर्षशोमेव

॥ स॰जी॰स॰ ॥ कर्त्तव्यमिदंत्वेकादशीदिनम्॥ महाभिनिवेशैः कृष्णभक्तैः पुंभिः स्त्रीभिश्चसर्वथा॥१८४॥ परतंत्रोभवे ॥ स॰रु॰ ॥
॥ ८५ ॥ द्यस्तुदरिद्रो दुर्बलोथवा॥ आचरेत्पर्कसकुर्वीतयथावसारेनचाधिकम्॥१८५॥ दानंदेयंयथाशक्ति
द्विजायमातयेनभोः॥ रात्रौजागरणंकार्यंभगवत्कीर्त्तनादिभिः॥१८६॥ विस्मार्यजागरार्थसन्मं
डपमथापिवा॥ गत्वतोऽस्यमूर्मेधस्यफलंतुंसपदेपदे॥१८७॥ स्त्रीभिः स्त्रीष्वेवकर्त्तव्यः पुंभिः पुंस्वे
वजागरः॥ कथादिभिर्हरेरेवनतुद्यूतादिभिः क्वचित्॥१८८॥ अथैकादशीव्रताकरणेप्रायश्चित
म्॥ एकादशीदिनेयस्तुभुंजीतान्नंकुसंगतः॥ चांद्रायणेनशुद्धिःस्यात्तस्यपुंसोनचान्यथा॥१८९
अथोपवासासामर्थ्यनिर्णयः॥ एकभक्तेननक्तेनतथैवायाचितेनच॥ उपवासेनदानेननिर्द्वा
दशिकोभवेत्॥१९०॥ अथोपवासानुकल्पाः॥ नक्तंहविष्यान्नमनोदनंवाफलंतिलाःक्षीरमथां
बुचाज्यम्॥ यत्पंचगव्यंयदिवापिवायुःप्रशस्तमत्रोत्तरमुत्तरंहि॥१९१॥ अथद्वादशीविधिः॥ प्रा
तःस्नात्वापुनःपूजांनित्यनैमित्तिकान्वयोः॥ कुर्यात्तत्रयथाहेनसंदेमेननिवेदनम्॥१९२॥ तंत्रेण
मूर्त्योरुभयोःसमाप्यप्रातरर्चनम्॥ व्रतंनिवेदयेभक्त्याहरयेस्वफलंव्रती॥१९३॥ अथव्रतनिवेद
नमंत्रः॥ अज्ञानतिमिरांधस्यव्रतेनानेनमेहर प्रसीदसुमुखोभूत्वाज्ञानदृष्टिप्रदोभव॥१९४॥ कृ ॥ ८४ ॥

ष्णमूर्तिंततोदद्याद्ब्राह्मणायसदक्षिणाम्॥ दानानिदद्याच्चान्यानियथाशक्त्यन्नमेववा॥१९५॥ भोज
यित्वाततोविप्रान्शक्त्यासाधूंश्चवैष्णवान्॥ हविष्यान्नेनकुर्वीतपारणांप्रयतोव्रती॥१९६॥ अ
थद्वादशीवर्ज्यानि॥ दिवानिद्रांपरान्नंचपुनर्भोजनमैथुने॥ द्वादश्यांवर्जयेत्तैलंकांस्यपात्रेचभोज
नम्॥१९७॥ अथपारणानिर्णयः॥ पारणाहेतुलभ्येतस्वल्पापिद्वादशीयदि॥ तत्रैवपारणांकुर्यात्
न्त्रतामुत्तरंयथेच्छती॥१९८॥ कलाप्यर्धद्वादशीरक्षानिशीथादूर्ध्वमेवहि॥ आमध्याह्नक्रियाःसर्वाः
कर्त्तव्याःशंभुशासनात्॥१९९॥ यदाभवेदल्पतराद्वादशीपारणादिने॥ उषःकालेद्वयंकार्यंप्रा
तर्मध्याह्नकर्मच॥२००॥ संकटेसमनुप्राप्तेद्वादश्यांदैवयोगतः॥ अद्भिस्तुपारणांकुर्यात्पुनर्भुक्तंन
दोषकृत्॥२०१॥ द्वादश्याःप्रथमःपादोहरिवासरसंज्ञितः॥ तमतिक्रम्यकुर्वीतपारणांविष्णुतत्परः
॥२०२॥ आभाकासितपक्षेषुमैत्रश्रवणरेवती॥ संगमेनेवभोक्तव्यंदशद्वादशीहरेत्॥२०३॥ मैत्राद्य
पादेस्वपितीहविष्णुःश्रुतेश्चमध्येपरिवर्त्तमेति॥ पौष्णस्यपादेप्रतिबोधमेतिसुप्तिप्रबोधपरिवर्त्त
नमेववर्ज्यम्॥२०४॥ एकादशीव्रतविधिस्तुमयायथावत्कौजनाःस्मृतिवचोन्वितवर्त्मनेस्यम्॥
सर्वैर्भवद्भिरपयादरतोविधेयोयोद्यापनंविधिवदस्यवदामिसम्यक्॥२०५॥ इतिश्रीसत्संगिजीवने

स॰जी॰तृ॰ नारायणाम्बरिषे धर्मशास्त्रे चतुर्थप्रकरणे प्रबोधन्युत्सवे एकादशीव्रतविधिनिरूपणं नाम चतु- अ॰ ३४ ॥
॥ ८५ ॥ स्त्रिंशोऽध्यायः ॥ ३४ ॥ श्रीनारायण उवाच ॥ उद्यापनं विना नैव व्रतं हि फलदं भवेत् ॥ तस्मात्तत्र य-
त्नतः कार्यमेकादशीव्रतस्य तत् ॥ १ ॥ अस्तगे च गुरौ शुक्रे बाले वृद्धे मलिम्लुचे ॥ उद्यापनं न कर्तव्यं का-
र्यमन्यत्र शक्तितः ॥ २ ॥ महापूजा प्रकर्तव्या विप्रमेतं वरं तथा ॥ शक्त्या स्वर्णं च गोरूप्या सामान्योद्याप-
नं त्विति ॥ ३ ॥ सकृदेव हविष्याशी दशम्यां प्रयतः पुमान् ॥ ब्रह्मचर्यपरो रात्रौ स्वपेद्भूमौ हरिं स्मरन् ॥ ४ ॥
रजन्याः पश्चिमे यामे समुत्थाय यथाविधि ॥ स्वदीपस्त्री कुर्वीत शौचस्नानादिनैत्यकम् ॥ ५ ॥ पूजोपहा-
रान्संभृत्य विधिज्ञं ब्राह्मणं ततः ॥ आहूय स्वस्थचित्तो वृत्वा श्रीपुरुषोत्तमम् ॥ ६ ॥ स्वकीयगेहे क्षे-
त्रे वा पुण्यक्षेत्रेऽथवा शुभे ॥ विधाय विधिना कुर्यात्पूजां विधिव्रती ॥ ७ ॥ मंडपे निर्मिते रम्ये कदली-
स्तंभमंडिते ॥ विधाय सर्वतोभद्रं तन्मध्ये स्थापयेद्घटम् ॥ ८ ॥ पंचपल्लवसंयुक्ते सूक्ष्मवस्त्राभिवेष्टिते
॥ तस्मिन्पात्रं निदध्याच्च रम्यास्तरणमंडितम् ॥ ९ ॥ कमलं द्वादशदलं नानावर्णोपशोभितम् ॥ अंत-
र्द्वादशभिः पत्रैर्युक्तं कुर्यात्तदंतरे ॥ १० ॥ तन्मध्ये वासुदेवस्य हैमीं लक्ष्मीयुतस्य च ॥ यथाशक्त्या कारयित्वा
प्रतिमां स्थापयेन्नरः ॥ ११ ॥ द्वादशानुक्रमेणैव केशवाद्याः सशक्तयः ॥ तदंगदेवताः स्थाप्याः पद्मपत्रे ॥ ८५ ॥

षु सर्वतः ॥ १२ ॥ आद्ये दले केशवस्तु स्थापनीयः श्रिया सह ॥ नारायणस्तदग्रे च पद्मया दक्षिणक्रमा-
त् ॥ १३ ॥ माधवो नित्यया साकं गोविंदश्चेड्यया सह ॥ रमया सह विष्णुश्च माधव्या मधुसूदनः ॥ १४ ॥ त्रि-
विक्रमश्च पद्माक्ष्या वामनः कमलायुतः ॥ श्रीधरः कांतिमत्या च हृषीकेशापराजिते ॥ १५ ॥ पद्मना-
भः पद्मवत्या राधया दामोदरो ततः ॥ स्थापनीयाः क्रमेणैवमेता द्वादशदेवताः ॥ १६ ॥ तथाऽष्टांतरपत्रे-
षु स्थाप्या वा द्वादशदेवताः ॥ संकर्षणः पूर्वपत्रे स्थाप्यः सह सुनंदया ॥ १७ ॥ वासुदेवो हरिण्याऽथ दक्षि-
णक्रमतस्ततः ॥ प्रद्युम्नश्च धिया साकमनिरुद्धः सुशीलया ॥ १८ ॥ स्थापनीयः क्रमेणैव नंदया पुरुषो-
त्तमः ॥ अधोक्षजस्त्रपायुक्तः क्षेमंकार्या च केसरी ॥ १९ ॥ अच्युतो विजयायुक्तः कंदर्पा च जनार्दनः
॥ उपेंद्रः कमलायुक्तो हरिः सह हिरण्मया ॥ २० ॥ कृष्णः सुलक्षणायुक्तः स्थापनीयोऽन्तिमे दले ॥ त-
तः पूजां प्रकुर्वीत यथाशक्ति यथाविधि ॥ २१ ॥ पंचामृतेन च स्नानं कार्यं समंत्रपूर्वकम् ॥ महाभिषेकः
कर्तव्यः कृत्वा देवं प्रपूजनम् ॥ २२ ॥ नवीनवस्त्रभूषादि समर्प्य च चतुःसमम् ॥ सर्वगंधं च वा भक्त्या
कमलोऽभिः प्रपूजयेत् ॥ २३ ॥ सहस्रतुलसीपत्रैः पूजयित्वाऽमृताक्षयम् ॥ धूपं समर्प्य दीपं च नैवेद्यं
तु निवेदयेत् ॥ २४ ॥ मोदकान्गुडशर्कराश्च चूर्णानि घृतपूरकान् ॥ सोहालिकाश्च कंसारं सक्तून्से-

॥स·जी·तृ०
॥९६॥

वाप्यमेरकान्॥२५॥वरकाश्च पायसं दुग्धकूरं दध्योदनं तथा॥पिंडकान्पूरिकाश्चैव शालिपिष्टांश्च ॥स·३४॥
जडुकान्॥२६॥तिलपिष्टं कृतं विशेषाच्छालिपिष्टं सशर्करम्॥रंभाफलं च सघृतं तु कूष्मांडं गुडोदनम्॥
२७॥समर्पयेत्तद्दिने नैवेद्यं तांबूलं च फलं व्रती॥महानीराजनं कृत्वा दद्यात्सुष्पांजलिं ततः॥२८॥समाप्य
पूजां सम्मानि दद्याच्छक्त्यनुसारतः॥गोभूतिलहिरण्यांश्च गजादीनि दृढव्रतः॥२९॥ततो द्वितीयस्य पुर
तो गोष्ठे वा होममाचरेत्॥मंत्रेणेदं विष्णुरिति समिदाज्यतिलोदनैः॥३०॥नैवेद्यं च यजेत्तस्मान्नामभिः
केशवादिभिः॥गाश्चतुर्विंशतिं दद्याद्द्वादशकां वाथ कांचनम्॥३१॥देया गावः श्वेतवर्णाः कपिला वा
यथाविधि॥रात्रौ जागरणं कृत्वा प्रभाते चार्चयेद्धरिम्॥३२॥स्वर्णनिर्मितां मूर्तिं दद्यात्स्वगुरवे हरेः
॥अलंकारांश्च वासांसि दत्वा विप्रांश्च भोजयेत्॥३३॥चतुर्विंशतिसंख्याकान्सतिलांश्च फलोदकान्
घटान्दत्वा द्विजेभ्यश्च प्रदद्याद्दक्षिणां नरः॥३४॥गंधपुष्पांशुकाद्यैश्च संपूज्य ब्रह्मचारिणः॥साधवो
भोजनीयाश्च सच्छैर्विष्णुसेवकाः॥३५॥ततश्च पारणं कुर्यात्स्वजनैः सह स व्रती॥एवं कृते व्रतमिदं यथो
क्तफलदं भवेत्॥३६॥एसैकादशिकाव्रतस्य महिमा सच्छास्त्रवृंदे मया निर्मथ्योद्धृत आदराद्व्रतवि
धिः सांगश्च संक्षेपतः॥श्लोकः श्रीरमणाभितिखिलजनप्रीत्यै तमेतं नरो यः श्रोष्यत्यसंयथा वा पठिष्य ॥९६॥

तिस तु मासस्य समीष्टं फलम्॥३७॥इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे
प्रबोधप्रमुखएकादशीव्रतोद्यापनविधिनिरूपणनामा चतुस्त्रिंशोऽध्यायः॥३४॥जनक उवाच॥केश
वादीनि रूपाणि यान्येकादशतिथिषु॥पूज्यान्युक्तानि तेषां त्वं ब्रूहि लक्षणानि नः पृथक्॥१॥श्रीनारा
यणमुनिरुवाच॥मूर्त्तीनां केशवादीनां वासुदेवस्य वै जनाः॥कथयामि यथाशास्त्रं लक्षणानि पृ
थक्पृथक्॥२॥चतुर्विंशतिरूपिण्या एकादश्याः प्रियायमः॥चतुर्विंशतिमेकोपि विष्णुर्मूर्त्तीर्दधा
ति वै॥३॥शंखचक्रगदाब्जानां स्थानभेदेन धारणात्॥नामान्युक्तानि तासां वै चतुर्विंशतिरेव हि॥४॥
धारणं स्थानभेदेन शंखादीनां यथा तथा॥वदामि तत्तु विज्ञेयं दक्षिणाधःकरक्रमात्॥५॥पद्मं शंखं
तथा चक्रं गदां वहति केशवः॥शंखं पद्मं गदां चक्रं धत्ते नारायणः सदा॥६॥गदां चक्रं तथा शंखं प
द्मं वहति माधवः॥चक्रं गदां पद्मशंखौ गोविंदो धरते भुजैः॥७॥गदां पद्मं तथा शंखं चक्रं विष्णुर्बिभ
र्त्ति च॥चक्रं शंखं तथा पद्मं गदां च मधुसूदनः॥८॥पद्मं कौमोदकीं चक्रं शंखं धत्ते त्रिविक्रमः॥शं
खं चक्रं गदां पद्मं वामनो धरते सदा॥९॥पद्मं चक्रं गदां शंखं श्रीधरो धरते भुजैः॥हृषीकेशो गदां च
क्रं पद्मं शंखं दधाति च॥१०॥पद्मनाभः करैर्धत्ते शंखं पद्ममरिं गदाम्॥पद्मं शंखं गदां चक्रं धत्ते दामो

दरः स्मृतः ॥ २१ ॥ संकर्षणो गदाशंखपद्मचक्रधरः स्मृतः ॥ वासुदेवो गदाशंखचक्रपद्मधरो मतः 
॥ २२ ॥ चक्रशंखगदापद्मधरः प्रद्युम्न उच्यते ॥ अनिरुद्धश्चक्रगदाशंखपद्मधरः स्मृतः ॥ २३ ॥ चक्रं प॰
द्मं तथा शंखं गदां च पुरुषोत्तमः ॥ पद्मं कौमोदकीं शंखं चक्रं धत्तेऽप्यधोक्षजः ॥ २४ ॥ चक्रं पद्मं गदां शं
खं नरसिंहो बिभर्त्ति च ॥ गदां सरोजं चक्रं च शंखं धत्तेऽच्युतः सदा ॥ २५ ॥ पद्मं सुदर्शनं शंखं गदां धत्ते
जनार्दनः ॥ शंखं कौमोदकीं चक्रमुपेन्द्रो धरतेऽम्बुजम् ॥ २६ ॥ शंखं चक्रं सरोजं च गदां वहति वै हरिः
शंखं कौमोदकीं पद्मं चक्रं कृष्णो बिभर्त्ति च ॥ २७ ॥ इत्येताः केशवाद्यानां मूर्त्तयो लक्षणैर्मया ॥ निरू
पिता भक्तजनाः कृष्णैकादशी युताः ॥ २८ ॥ एकादशीनां शुक्लानामीश्वराः केशवादयः ॥ द्वादशी
नां च कृष्णानामीशाः संकर्षणादयः ॥ २९ ॥ मार्गशीर्षे शुक्लपक्ष एकादश्यां तु केशवः ॥ पूज्यस्तथा
कृष्णपक्षे तत्र संकर्षणोऽर्च्यते बुधैः ॥ ३० ॥ एवं पौषादिमासेषु पक्षयोः शुक्लकृष्णयोः ॥ नारायणादयः
पूज्या मलेऽतु पुरुषोत्तम ॥ ३१ ॥ अत्र संकर्षणाद्यास्तु तस्रो मूर्त्तयो मया ॥ प्रोक्तास्तु पृथगेवाश्चतुर्भु
जस्वरूपतः ॥ ३२ ॥ चित्तशाठ्येन कर्त्तव्यमेकादश्यां सर्वे जनाः ॥ लक्ष्मीकांतोऽत्र सर्वासां दाता तुष्यती सं
पदाम् ॥ ३३ ॥ पश्चात्तरुत्थाय विकुंठभर्त्तुः कृष्णस्वरूपाण्युपनाशनानि ॥ श्रीकेशवादीनि पुमांस्तु त 

श्रीस्मरैस्त्वेवैमंगलमिष्टमेतु ॥ ३४ ॥ इति श्रीसत्संगिजीवने नारायणचरित्रे धर्मशास्त्रे तृतीयप्रकरणे
प्रबोधसुत्सवे केशवादिमूर्त्तिलक्षणनिरूपणनामा पंचत्रिंशोऽध्यायः ॥ ३५ ॥ सुव्रत उवाच ॥ इती
श्रीहरिणा गीतं माहात्म्यादि निशम्य ते ॥ एकादश्या जनाः सर्वे संतुष्टिं परमां ययुः ॥ १ ॥ तमेव हृदि ज्ञा
नेतः श्रीकृष्णं धर्मनंदनम् ॥ तद्व्रतस्यैव नियमं जगदुः सत्कृतस्य ते ॥ २ ॥ स्वस्वस्थानं ततो गंतुमाज्ञाप्य
स्वाश्रितान्स्वजनान् ॥ सात्वतसमगमत्स्वामी वंद्यमानो जनव्रजैः ॥ ३ ॥ एकादशीव्रतविधिमाचरिष्यन्नृ
कृतात्मवः कृष्णस्तोऽभ्यर्थ्य जग्राह तद्व्रतनियमं नृप ॥ ४ ॥ महोत्सवे तु सामग्री कारयामास वाड्वैः ॥ रंभा
स्तंभादिभिः पुण्यामंडपं चाप्यचीकरत् ॥ ५ ॥ भूमौ पद्माराज्ञं पादौ किंचित्सुप्त्वा प्रभूतजे ॥ तृतीयः प्रहर
स्ताव शनैः शायनमापनम् ॥ ६ ॥ अजल्पन्निद्रया वा सावुत्थायासमानतः ॥ स्वस्वरूपं हृदि ध्यात्वा स
कं मस्कै नैंदीपयौ ॥ ७ ॥ आदौ शौचविधिं कृत्वा गंडूषान्द्वादशैव च ॥ तस्माभ्युन्मत्तगंगायां चकार वि
धिनाऽऽप्लवम् ॥ ८ ॥ स्नानांगतर्पणं कृत्वा कज्जलोऽभ्युत्थसोऽजलम् ॥ भूत्वाऽर्घ्यं नाथ श्रीविष्णोः राईवास
हद्धं ययौ ॥ ९ ॥ रघुरोने कशिष्योपि दशोपन्तु हरिसेविनाम् ॥ दासधर्मं स्वयं तोषमानिनाय निजाश्र
मम् ॥ १० ॥ पुष्पाणि चंद्रशैवानादानीपतु जसीचसः ॥ धौतांघ्रिपाणिः शुचिनी पर्यधाच्छितवाससी

२१॥ उपविश्यासने कौशे गोपीचंदनमृत्स्नया ॥ कृत्वा पंचोर्ध्वपुंड्राणि संध्यावंदनमाचरत् ॥२२॥ नित्य-
होमं ततः कृत्वा ब्राह्मणान्वेदवित्तमान् ॥ पूजाविधिं ज्ञानारूप्य प्रारेभे कृत्स्नपूजनम् ॥२३॥ ते पूजां का-
रयामासुर्ब्राह्मणास्ते यथाविधि ॥ विदधुः सर्वतोभद्रमादौ ते मंडलं शुभम् ॥२४॥ विचित्ररंगशोभाढ्ये
तस्मिन्कलशमुज्ज्वलम् ॥ सौवर्णं स्थापयामासुर्ब्राह्मणा विधिकोविदाः ॥२५॥ पंचपल्लवसंयुक्ते सू-
क्ष्मवस्त्राभिवेष्टिते ॥ तत्र स्थिते शुभे पात्रे रम्यास्तरणमंडिते ॥२६॥ कमलं द्वादशदलं नानावर्णोप-
शोभितम् ॥ अंतर्द्वादशभिः पत्रैर्युक्तं च कुर्मनोहरम् ॥२७॥ तन्मध्ये प्रतिमां हैमीं लक्ष्मीयोगेश्वरस्य
ते ॥ प्राणप्रतिष्ठां कृत्वैव स्थापयामासुरादरात् ॥२८॥ तदंगदेवताश्चान्याः पार्षदांश्च यथादिशम् ॥ स्था-
पयामासुरष्टांगोक्तेनोक्तविधिना द्विजाः ॥२९॥ पूर्वाद्यनुक्रमेणैव केशवाद्याः सवाक्कयः ॥ स्वात्माग्रंत-
रपत्रेषु स्थापितास्तदंगदेवताः ॥३०॥ आद्ये दले केशवस्तु स्थापितस्तेऽश्रियासह ॥ नारायणस्तदग्रे च प-
यपादक्षिणक्रमात् ॥३१॥ माधवो नित्यया साकं गोविंदश्चंद्रयासह ॥ रमया सह विष्णुश्च माधव्या मधु-
सूदनः ॥३२॥ त्रिविक्रमश्च पद्माक्षा वामनः कमलापुतः ॥ श्रीधरः कांतिमत्याग्रे रूपी केशपराजिते
॥३३॥ पद्मनाभः पद्मवत्या राधा दामोदरो ततः ॥ स्थापिता द्वादशैवैता बहिःपत्रेषु देवताः ॥३४॥ मार्ग-

शीर्षादिमासेषु द्वादशस्वेष्वनुक्रमात् ॥ एकादशीनाम्शुक्ला नामैता एव हि देवताः ॥३५॥ तयोरंतर-
पत्रेषु द्वादश स्वरूपि देवताः ॥ कृष्णैकादश्यधिष्ठात्र्यः स्थापिताश्च सवाक्रूपः ॥३६॥ संकर्षणः पूर्व-
पत्रे स्थापितः कमुनंदया ॥ वासुदेवो हिरण्याच सहाग्नेय्यां स्थितस्ततः ॥३७॥ प्रद्युम्नश्च धियासाकम-
निरुद्धः कृशीजया ॥ स्थापितोऽनुक्रमेणैव नंदया पुरुषोत्तमः ॥३८॥ अधोक्षजस्त्रयीयुक्तः क्षेमंकर्या-
न्नृकेसरी ॥ अच्युतो विजयायुक्तः सुदर्शा च जनार्दनः ॥३९॥ उपेंद्रः कमलायुक्तो हरिः सह हिरण्मया
॥ कृष्णः सुलक्षणायुक्तो द्वादशा स्थापिता इति ॥४०॥ स्थापयित्वाऽथ चंदादीन् पार्षदान्स्वदिक्षु ते ॥ पू-
जामकारयन्विप्रा मंत्रैर्वैदिकतांत्रिकैः ॥४१॥ तत्रादौ हृदये दध्यौ स्वामी योगेश्वरं प्रभुम् ॥ वामपार्श्वस्थ-
या लक्ष्म्या सह पंकजहस्तया ॥४२॥ पद्मासनसमासीनं किंचिन्मीलितलोचनम् ॥ प्राणाग्रदत्तदृष्टिं च स्मृ-
तपद्मोपरिस्थितम् ॥४३॥ मेघश्यामं चतुर्बाहुं कौस्तुभेन विराजितम् ॥ नानाभरणशोभाढ्यं किरीटदि-
ज सन्मुखम् ॥४४॥ अंके कृत्वा वामदक्षावुत्तानौ च भुजौ स्थितम् ॥ तत्करद्वयपार्श्वस्थे दधौ पद्ममहा-
गदे ॥४५॥ ऊर्ध्वे करद्वये तस्य पांचजन्यसुदर्शने ॥ ध्यात्वा तस्मिन्वासुदेवे चकार स्वमनः स्थिरम् ॥४६॥ उप-
चारैः षोडशभिस्तत्र आवाहनादिभिः ॥ नीलकंठोऽर्चयामास सप्रेम तमनन्यधीः ॥४७॥ पंचामृतेन सं-

॥स॰नी॰ट॰ ॥ ९५॥

स्नापयज्जपुत्रानां विधाय च ॥ महाभिषेकविधिना स्नापयामास तं पुनः ॥ ३८ ॥ सुगंधिनाकैः सरेणाचंद अ॰३६ ॥
नेन सितानाक्षतैः ॥ सुगंधिभिर्बहुविधैः पुष्पैरानर्चतं ततः ॥ ३९ ॥ धूपं दत्त्वा दशांगं च तस्मै दीपान्वि
वेद्य च ॥ अर्पयामास नैवेद्यं चतुरः पावकैः कृतम् ॥ ४० ॥ मोदकान्गुडकांश्चैव चूर्णानि घृतपूरकान्
